
विजयीन्द्रविजयवैभवम्



श्री १०८ श्री विजयीन्द्रतीर्थश्रीचरणाः



श्री १०८ श्री सत्यप्रमोदतीर्थश्रीचरणाः

॥ श्री दिग्विजयरामो विजयते ॥

श्रीमद्विजयीन्द्रतीर्थपूज्यचरणविरचित-
सर्वसिद्धान्तसारासारविवेचनगतस्य
रामानुजमतनिरासपरस्य
दशमपरिच्छेदस्य
मण्डनात्मकम्

श्री विजयीन्द्रविजयवैभवम्

श्री सत्याभिज्ञतीर्थपूज्यपादपद्माराधक-
श्री सत्यप्रमोदतीर्थविरचितम्

संपादकः
पं. केशवाचार्य कट्टि

प्रकाशकः
सत्यध्यान कट्टि

Shri Vijayeendravijayavaibhavam :
by Shri 1008 Shri Satyapramodateertha Swamiji of
Shri Uttaradi Mutt, Bangalore-560004

Edited by : Shri Keshavacharya Katti,
104, 4th Main, N. R. Colony,
Bangalore-560019

Published by : Satyadhyan Katti,
No. 16, Uttaradi Mutt Road, Basavanagudi,
Bangalore-560004

First Edition : 1990

© Copyright Reserved

Price : Rs. 15–00

Printed by :

Dhananjay Warkhedkar
Sudha Mudrana
Uttaradi Mutt Compound
Bangalore-560004

अस्मद्गुरुवर्याणां
न्यायवेदान्तव्याकरणमीमांसाद्यनेकशास्त्रपारावारपारङ्गतानां
श्रीमन्न्यायसुधाव्यासत्रयादिसद्ग्रन्थपाठप्रवचननिरतानां
अभिनवताण्डव-श्रीमत्सत्यप्रमोदतीर्थविरचितव्याख्याविभूषित-
युक्तिमल्लिकाद्यनेकग्रन्थसंपादकानां
श्रीमत्सत्यध्यानविजय-सत्याभिज्ञविजय-
इत्याद्यनेकगद्यपद्यकाव्यकर्तॄणां
ज्ञानभक्तिविरक्तिविनयादिसद्गुणभूषितानां
श्रीमदुत्तरादिमठाधीशश्रीमत्सत्यप्रमोदतीर्थकरुणापात्राणां

कट्टि इत्युपाह्वयानां श्री. पं. केशवाचार्याणां

सहस्रचन्द्रदर्शनमहोत्सवस्मारकं इदं
प्रकाशनम् ।

॥ श्री दिग्विजयरामो विजयते ॥

भूमिका

परमपुरुषार्थो मोक्ष आत्यन्तिकानिष्टनिवृत्तिरिष्टावाप्तिश्चेति द्व्यंशात्मको मतः । तत्रानिष्टनिवृत्तिरूपोऽशः कुसमयानामसारताज्ञानेन सिध्यति, इष्टप्राप्तिरूपश्चापरोऽशः सत्सिद्धान्तस्य सारतानिर्धारणेन संपद्यते। तथा हि श्रूयते "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत" इति ॥

सकललौकिकवैदिकप्रमाणसामञ्जस्यं यत्र तदेव मतं सारम् । अतथाभूतं त्वसारमिति निर्णयः । इदं च सारतालक्षणं सामस्त्येन श्रीमध्वसिद्धान्त एव समन्वेति। तदितरेषु प्रमाणपदवीपरिभ्रष्टेष्वसारेषु कुसमयेषु सिद्धान्तशब्द औपचारिक एव ।

श्रीविजयीन्द्रतीर्थश्रीचरणाश्चतुरधिकशतग्रन्थरत्ननिर्माणेन मुमुक्षुप्रपञ्चस्य महोपकारका इति सुप्रथिताः। तैरेतैः पूज्यचरणैः स्वनिर्मितेन 'सर्वसिद्धान्तसारासारविवेचनम्' इत्येतन्नामकेन अनर्घ्येण प्रबन्धरत्नेन मध्वसिद्धान्तस्य समन्ततः सारता सुदृढाभिः श्रुतिस्मृतिभिः सद्युक्तिभिश्च समुज्वलतया संप्राकाशि। तद्विरुद्ध-

प्रक्रियाणामसारता च विविच्य व्यवस्थापि। प्रबन्धरत्नस्यास्य दशमः परिच्छेदो रामानुजमते ये दूषणीयांशास्तेषां सप्रमाणं निरसने व्याप्रियते। प्रमाणपुरस्सरं व्युत्पादितस्य दूषणगणस्य लङ्घने न कोऽपि जङ्घाल इति हि स्थितिः।

"भक्त्यैव तुष्टिमभ्येति हरिर्नान्येन केनचित्" इत्यादीनि परः-सहस्राणि प्रमाणानि निर्मला भक्तिरेवैका भगवत्प्रसादजननी मोक्ष-हेतुश्चेत्युद्घोषयन्ति। भक्तिरिति च सैवोच्यते या खलु नवविधद्वेषैरदूषिता ।

भक्तिं विनाऽपि मुक्तिप्राप्तिः इति वर्णनं, विष्णौ स्वगतभेद-कथनं, अन्येषां तेन साम्योक्तिः, साम्यनिषेधपराणां प्रमाणानां निन्दा, इत्यादीनि नवसु परतत्त्वप्रद्वेषेषु परिगण्यन्ते।

रामानुजमते तु एते प्रद्वेषाः प्रतिपदं परिस्फुरन्ति। तत्र हि, प्रपत्तेरपि भक्तिं विना साक्षान्मोक्षसाधनत्वाभिधानेन भक्तेः प्रधान-साधनत्वं पराक्रियते। नित्यज्ञानादीनां भगवद्धर्माणां भगवतो भिन्नत्ववर्णनेन तस्मिन्स्वगतभेदराहित्याख्यो गुणो निराक्रियते। आनन्दानुभवे मुक्तानां भगवत्साम्यवर्णनेन तस्य समाधिकवर्जित-त्वलक्षणो महिमा तिरस्क्रियते। विषमसाधनानां समफलप्रदान-कथनेन भगवतो वैषम्यादिदोषातिदूरता अपाक्रियते। अप्रमितं ब्रह्मणो जगदुपादानत्वं पुरस्क्रियते। प्रमिता सर्ववस्तुषु विशेषनाम-शक्तिर्धिक्क्रियते। जीवत्रैविध्यनिराकरणेन तत्साधकानामनु-भवादिनिखिलप्रमाणानां प्रामाण्यं न्यक्क्रियते।

यथैवैतत्सर्वं तथा श्रीविजयीन्द्रतीर्थश्रीचरणैः स्वग्रन्थे सुनिपुणतरमुपपादितम् ।

स्थितेऽप्येवं महापरकालनामा कश्चन यतिः सारासारविवेचनग्रन्थस्य विमर्शाभासमुपक्रम्य तदुदाहृतानि सुस्पष्टानि प्रमाणानि स्वच्छन्दमपलप्य, विमर्शकमर्यादामवधीर्य, परेष्वश्लीलार्थशब्दप्रयोगपराक्रमेणैवात्मनः कृतकृत्यतां मनुते ॥ द्वैतिनो नित्यसंसारिण इति प्रतिजानानः पुनः क्वचिद् द्वेषोद्रेकेण स्वात्मानं स्वसिद्धान्तं च विस्मृत्य द्वैतिनस्तमोयोग्या इति उद्गिरति ।

यद्यपि स्वव्याघातादिपराहतं सुस्फुटदोषमेवंविधं वचनजालं सहृदयैरौदास्यमेव समर्हति तथाऽपि बुभूषूणां मन्दशेमुषीणां तत्कृतं मनःकालुष्यं मा भूदित्येवैषोऽस्माकं तद्दूषणसमुद्यमः 'विजयीन्द्रविजयवैभवं' इति प्रबन्धप्रणयनेन ।

श्रीमद्विजयीन्द्रतीर्थश्रीचरणैः समादृतस्य संस्थापितस्य सत्सिद्धान्तस्य विजयवैभवसंप्रकाशो नित्यनिरस्तसमस्तदुस्समयदुस्तमसतया नित्यमेव प्रचकास्ति । तदपि पुण्यस्मरणानां पूज्यचरणानां सारासारविवेचनग्रन्थस्य मननेन बुद्धिशुद्धिसंपादकतया सफल एवास्माकं प्रयत्न इति सुधीभिः सन्तोष्टव्यम् ।

जानन्त्येव सन्तो यदस्मद्देशिकैः श्रीसदभिज्ञतीर्थश्रीचरणैः पद्मसरोवरक्षेत्रे रामानुजमतीयैर्विद्वद्वरैः सौहार्देन वादकथां प्रस्ताव्य नैकेषां पूर्वोत्तरविरोधानां प्रदर्शनेनैव तन्मतं निरवकाशतयाऽ-

पाकारीति । पूज्यपादानां तेषामनुग्रहं प्रतिपदमुपजीव्य तत्संदर्शिताध्वानं समनुरुध्यैव च लब्धात्माऽयं नः प्रबन्धो निरन्तरं तत्संप्रीतये भूयादित्यस्मदुपास्यं श्रीमूलरामचन्द्रं क्रियासमभिव्याहारेण संप्रार्थयामहे ।

आशास्महे चैतत्पठनपाठनेन सन्तस्तदनुग्रहभाजो भूयासुरिति ।

श्री सत्यप्रमोदतीर्थश्रीचरणाः

◆ ◆ ◆

अनुक्रमणिका

◆ ◆ ◆

॥ श्री दिग्विजयरामो विजयतेतराम् ॥

श्री विजयीन्द्रविजयवैभवम्

रामं दिग्विजयं सुनिर्मलतनुं विभ्राजमानं सदा
श्रीसीतायुतमूलराममलं सद्वंशरामं तथा ।
व्यासं विठ्ठलमप्रमेयसुसुखं मध्वं जयीन्द्रं गुरू-
नन्यान्मद्गुरुमानमामि सततं मद्योग्यसौख्याप्तये ॥ १ ॥

राम रामेति रामेति रमे रामे मनोरमे ।
इत्युमायै शिवोक्तं श्रीमूलरामं भजेऽनिशम् ॥ २ ॥

रामनुजमतध्वान्तमञ्जसा येन वारितम् ।
प्रकाशितं च तत्त्वं तं भजे मध्वदिवाकरम् ॥ ३ ॥

यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयम् ।
लभन्ते मानुषा नूनं ताञ्जयार्यगुरून्भजे ॥ ४ ॥

व्यासमध्वजयीन्द्राध्वसाध्वभ्यासाप्तशुद्धधीः ।
विजयीन्द्रो विद्वदिन्द्रो वीरो विजयते सदा ॥ ५ ॥

सारता तत्त्ववादस्यासारता तद्विरोधिनाम् ।
विवेचिता यैर्वन्दे तान्विजयीन्द्रमुनीश्वरान् ॥ ६ ॥

दुर्वादिमतविच्छित्तौ नैजनैपुण्यनिर्भरः ।
संदध्यान्मयि तत्सिद्धिं सत्यध्यानगुरूत्तमः ॥ ७ ॥

अस्मद्देशिकपादाब्जे संप्रणम्य यथामति ।
विजयीन्द्रार्यसुकृतेर्वक्ष्ये विजयवैभवम् ॥ ८ ॥

परकालेन यतिना दोषाभासान् प्रजल्पितान् ।
निष्कृष्यानूद्य संक्षेपात् निराकुर्वे मितैः पदैः ॥ ९ ॥

द्रव्याद्रव्यभेदवादभङ्गः

विजयीन्द्रतीर्थकृतसर्वसिद्धान्तसारासारविवेचनम् :

न तावद् द्रव्याद्रव्यविभागो युक्तः। अद्रव्यत्वेनाभिमतानां रूपादीनां तदाश्रयद्रव्याणां चाभिन्नत्वात्। नीलो घट इत्यादि प्रतीत्या तदभेदस्यावश्याङ्गीकार्यत्वात्। न हि भेदे सामानाधिकरण्यप्रतीतिर्दृष्टचरी ॥

परकालयतिः :

नैल्यघटयोर्विशेष्यविशेषणभावावगाहनेन भेदावलम्बिन्यैव तया नीलघटयोरभेदस्य दुरुपपादत्वात् । इति ॥

खंडनम् :

तदसारम् । नेयं प्रतीतिः चैत्रस्य दण्ड इत्यत्रेव विशेष्यविशेषणभावमवगाहते किं नाम 'आनन्दं ब्रह्म' इत्यत्रेव स्वरूपाभेदमेव ।

किं च सामानाधिकरण्यप्रतीतिः अवश्यं अभेदविषयेत्युक्ते विशेष्यविशेषणभावावगाहनेन तया अभेदस्य दुरुपपादत्वादित्युक्तेः व्यधिकरणत्वात् । सामानाधिकरण्ये अभेदपरत्वस्यैव निरसनीयत्वात् । सामानाधिकरण्यस्य चाभेदपरत्वानङ्गीकारे अभेदः कुत्रापि वाक्यार्थो न स्यात् । न हि घटः द्रव्यं इत्यत्रापि अस्त्यभेदबोधकमन्यत्सामानाधिकरण्यात् । एवं त्वदभिमते 'आनन्दं ब्रह्मणः' इति श्रुतिबोधितधर्मभूतानन्दाद्विलक्षणे 'आनन्दं ब्रह्म' इति श्रुतिबोधितदिव्यात्मस्वरूपलक्षणनिरतिशयानन्दे त्वयाऽपि सामानाधिकरण्यमेवाभेदे प्रमाणमेष्टव्यम् । घटस्य नैल्यं इति विशेषणविशेष्यभावोऽपि प्रतीयते इति चेत् प्रतीयताम् । किं तावता । सा प्रतीतिः भेदावलम्बिन्येवेति तु दुरुक्तम् । सा हि खलु संबन्धमात्रमवगाहते । नत्वेव भेदम् । षष्ठ्यर्थस्य संबन्धताऽनतिरेकात् । संबन्धव्यवहारो भेदव्याप्त इति तु दुराशां अग्रे विशेषसमर्थनेनापाकरिष्यामः । अभेदेऽपि अस्येदमिति संबन्धितया अवभासस्य विशेषबलेनैवोपपादयिष्यमाणत्वात् । एतेन भेदविषये 'यदग्ने रोहितं रूपं' इत्यादि श्रुत्युदाहरणमपि निरस्तम् । न हि तद्वाक्ये भेदः पदार्थो वाक्यार्थो वा । संबन्धमात्रं त्वनुमतमेवेत्युक्तम् ।

परकालयतिः :

शुक्ल एव घटे पाकेन नैल्यमुत्पन्नमित्यनन्यथासिद्धप्रत्यक्षं च तत्र भेदे प्रमाणम् । इति ॥

खण्डनम् :

तदप्यसारम् । किं अस्य प्रत्यक्षस्य विशिष्टयोः शुक्लघट-नीलघटयोः भेदे प्रामाण्यमित्याशयः । उत विशेष्यस्य घटस्य विशेषणाभ्यां शौक्ल्यनैल्याभ्यामिति । नाद्यः । इष्टापत्तेः । विशिष्टयोः पदार्थान्तरत्वेन तयोर्भेदोपगमात् । न द्वितीयः । शौक्ल्यं नैल्यं वा न घट इति प्रत्यक्षेणाविषयीकरणात् । प्रत्युत पूर्वं शुक्लो घट इति, इदानीं च पाकानन्तरं नीलो घट इति च, उभयत्रापि गुणगुणिनोः, चैत्रस्य दण्डः चैत्रस्य कुण्डलमिति प्रतीतिविलक्षणतया, अभेदस्यैव स्फुटं विषयीकरणात् । प्रत्यक्षोपस्थापितविरुद्धधर्माधिकरणत्वेन भेदोऽनुमीयते चेदेवं तर्हि न प्रत्यक्षं भेदे प्रमाणयितव्यम् । किं त्वनुमानमेव । तच्च न प्रत्यक्षसिद्धाभेदापलापस्येष्टे ।

परकालयतिः :

रूपादि स्वाधिकरणाद्भिन्नं स्वाश्रये स्थिरेऽप्यागमापायिधर्मत्वात् असकृन्निरुद्धगतिकविषयसंयुक्तालोकवत् । इति ॥

खण्डनम् :

तत्तुच्छम् । अद्रव्यस्य रूपादेस्त्वया संयोगानङ्गीकारात्, साध्ये अधिकरणपदेन, साधने आश्रयपदेन च संयोगसंबन्धेन तथात्वं विवक्षितं चेद् बाधः असिद्धिश्च । संबन्धान्तरेण चेद् दृष्टान्तस्य साध्यसाधनवैकल्ये । किं चात्र किं यावद्द्रव्यभावि रूपादि पक्षः । अनेवंविधं वा । नाद्यः । हेतोरसिद्ध्यापत्तेः । द्वितीयेऽपि किं

भिन्नत्वमात्रं साध्यं उतात्यन्तभिन्नत्वम्। नाद्यः सिद्धसाधनत्वात्। खण्डितानां गुणानां गुणिना भेदाभेदाभ्युपगमात्। न द्वितीयः। हेतोः अभेदनिराकरणेऽसामर्थ्येन अप्रयोजकत्वात्। न खलु कालान्तरभाविन्यौ संबन्धविनाशोत्पत्ती सामानाधिकरण्यगोचरप्रत्यक्षसिद्धाभेदापलाप- स्येशाते।

सामानाधिकरण्येनाप्रमीयमानत्वं उपाधिश्च। न अस्य साध्याव्यापकता। विषयीभूतस्य घटादेः आलोकेन, घटः आलोक इति, सामानाधिकरण्याप्रतीतेः॥ नापि साधनाव्यापकता शुक्लः पट इत्याद्यबाधितप्रतीतेः।

यच्चात्र पृथक्सिद्धत्वं नाम पृथगुत्पत्तिज्ञप्तिमत्त्वं इति कथयित्वा पुनः अपृथक्सिद्धत्वं इत्यस्य स्वसत्ताकाले धर्मिणमन्तरेणान्यत्र नेतुमशक्यत्वमेवेति अर्थकथनं तदन्योन्यासङ्गतम्। अपृथक्सिद्धत्वं नाम पूर्वोक्तप्रतियोगितया पृथगुत्पत्तिज्ञप्तिराहित्यमेव निरूपणीयम्। एतच्चाभेदपर्यवसितमेवेत्यतिरोहितम्। एवंभूतस्यान्यत्र नयनप्रसक्तिरेव न संभवति येन तत्र निषेधोक्तिः सङ्गच्छेत।

यदपि धर्मिभिन्नप्रवृत्तिनिमित्तकयोः समानविभक्तिकयोः शब्दयोः एकार्थबोधकत्वमिति सामानाधिकरण्यप्रत्ययपरिष्करणं तदप्यसारम्। प्रवृत्तिनिमित्तधर्माणां धर्मिणा सर्वत्र भिन्नत्वमेवेति कल्पनाया निर्मूलत्वात्। धर्माणां यावद्द्रव्यभावित्वे अभेदाङ्गीकारस्यैवौचित्यात्। न च तत्रापि विवादः। नीलमुत्पलमित्यत्र नैल्यं

हि यावदुत्पलभावि । न च तयोरङ्गुलीद्वयवद्भेदेन उपलम्भोऽस्ति । त्वयाऽपि तदनङ्गीकारात् । नापि कुण्डमिवोत्पलमधिकरणत्वेन, बदराणीव नैल्यमाधेयत्वेन, परिस्फुरति । किं नाम तदेव तदिति । न चैषा प्रतीतिर्भ्रान्तिः । बाधकाभावात् । नैल्योत्पलयोर्भेदावगाहिनी प्रत्यक्षप्रतीतिर्हि बाधिका भवेत् । अनुमानादीनामभेदप्रत्यक्षरोधेनोत्थानस्यैवासंभवात् । न च भेदावगाहिनी प्रत्यक्षप्रतीतिरस्ति । तेन प्रत्यक्षत एव सिद्धो नैल्योत्पलयोरभेदः । अपर्यायशब्दवाच्यत्वादिभेदव्यवहाराः विशेषबलेनैव निर्वाह्याः ।

अतः साधूक्तं न हि भेदे सामानाधिकरण्यप्रतीतिर्दृष्टचरीति ॥

न च नीलो घट इत्यत्र नीलादिशब्दस्य नीलादिमत्परत्वम् । प्रतीतिव्याख्यानापातात् । नीलरूपमित्यत्र यन्नीलं तस्यैवेह प्रतीतेः । अन्यथा इहापि नीली घटः इति धीः स्यात् । मतुब्लोपादिकल्पनं तु व्यवहारे न तु प्रतीतौ । नियमेन तथा प्रयोगदर्शनेन तयोरभेदपरत्वस्यैव वक्तुं युक्तत्वाच्चेति ।

एतेन यदुक्तम्, एवं शाब्दी प्रतीतिर्भेदावगाहिनी चेत् इन्द्रियजन्याऽपि तथैवेति, तदपि निरस्तम् ।

सामानाधिकरण्यप्रतीतेः नीलघटभेदावगाहित्वस्य दूषितत्वात् । प्रत्युत प्रत्यक्षत एव तदभेदस्योपपादितत्वात् । शब्दानुमानयोरभेदप्रत्यक्षरोधेन भेदविषयकत्वासंभवस्य चोक्तत्वात् ।

इन्द्रियजन्यप्रतीतेः शाब्दप्रतीत्यनुरोधित्वोक्तेरसारत्वात्। प्रत्युत वैपरीत्यस्यैवोचितत्वात्।

परकालयतिः :

एवं च प्रतीतिव्याख्यानाप्रसक्त्या न तत्रसञ्जनावकाशोऽपि। न हि द्वौ घटाविति प्रतीतेर्घटद्वयविषयकत्वं व्याख्येयम् इति।

खण्डनम् :

तदसारम्। नीलो घट इति प्रतीतेः नीलवान्घटः इति व्याख्याने खलु स्फुटप्रतीतेरपलपापत्त्या प्रतीतिव्याख्यानदोषः आपादितः। न ह्येवं सति द्वौ घटौ इति प्रतीतिमादाय प्रतिबन्दीग्रहणावकाशः। न हि तत्रेव अत्र द्वौ नीलघटौ इति प्रतीतिरस्ति। न च तत्र नीलवान् घट इतिवत् घटवान् घटः इति व्याख्यानं येन त्वदुक्तप्रतिबन्दी सङ्गच्छेत।

परकालयतिः :

न हि प्रतीतिस्वभाववित्कश्चित् विशिष्टप्रतीतेर्विशेषणविशेष्याभेदविषयकतां ब्रूते।

खण्डनम् :

तदतीव मन्दम्। न ह्यत्र दण्डी चैत्र इतिवत् नीलवान् घट इति विशिष्टप्रतीतिरुदाहृता। किं तु नीलो घट इति सामानाधिकरण्यप्रतीतिरेव। नात्र विशेषणविशेष्ययोरभेदप्रसक्तिः। येन तन्निषेधः

सङ्गच्छेत । किं तु विशेष्ययोरेव नीलघटयोः परस्परम् । वस्तुतो यावद्द्रव्यभाविनां गुणादीनामाश्रयेण परस्परं चाभेदः । विशेषाङ्गीकारात् भेदव्यवहारोपपत्तिः । अतो यत्किंचिदेतत् ।

यच्चात्राप्रस्तुतमेव बहु प्रजल्पितं तत्सर्वमप्यसारम् । तथाहि । ब्रह्मैव परस्य निर्विशेषमित्युक्तिः परमताज्ञानविजृम्भिता । अस्माभिः ब्रह्मणोऽपि सविशेषत्वाङ्गीकारात् । यदपि भेदस्य धर्मिस्वरूपत्वे संशयाद्यनुपपत्तिः सप्रतियोगिकत्वाप्रतियोगिकत्वविरोधः इत्यादिदोषाभासव्युत्पादनं तत्सर्वं विशेषसमर्थनेन परिहरिष्यते ॥ कुतश्चिद्व्यावृत्तस्य वस्तुनः प्रतीतावपि व्यावृत्तिविशेषाग्रहणादेव संशयाद्युपपत्तेः ।

देहदेहिनोर्जीवेश्वरयोः न तथा प्रत्यक्षसिद्धो भेद इति वचनं प्राणिमात्रानुभवपराहतम् । मम देहः नाहं निर्दुःख इति भेदस्य सार्वजनीनानुभवसिद्धत्वात् ।

अस्मदभिमतविशेषस्य मायावाद्यभिमताविद्यासालक्षण्यं परिकल्प्य ब्रह्मादिसर्वेषां यत् भ्रान्तत्वापादनं तत्स्वस्यैव महाभ्रान्तत्वं संस्थापयति । यत्राभेदः प्रमितः भेदव्यवहाराश्च अनौपचारिकाः प्रमिताः तत्रैव तन्निर्वाहकः स्वनिर्वाहकश्च प्रमाणप्रमितो विशेषोऽस्माभिरुररीकृतः । मायावादिनस्तु मानाघातासहिष्णुत्वलक्षणामविद्यां स्वीकुर्वन्ति । तदेवं सुस्फुटं विलक्षणयोः सालक्षण्यवादः कथमुन्मत्तप्रजल्पो न भवेत् ॥ अतः साध्वेवोक्तं रामानुजमते द्रव्याद्रव्यविभागो न युक्तः इति ।

वर्णात्मकशब्दस्य नित्यद्रव्यत्वसमर्थनम्

विजयीन्द्र....विवेचनम् :

द्रव्यं षड्विधमित्ययुक्तम्। वर्णात्मकशब्दादेर्द्रव्यान्तरस्य सत्त्वात्। "यस्य वेदाः शरीरम्" इति वेदानां ब्रह्मशरीरत्वोक्त्या द्रव्यत्वसिद्धेः। त्वन्मते अद्रव्यस्य शरीरत्वायोगात्। न च तेषां शरीरत्वं गौणम्, पृथिव्यादीनामपि तथात्वापातात्।

परकालयतिः :

'यस्य वेदाः शरीरमिति' श्रुतिः अभिमानिदेवताचतुष्टयस्य भगवच्छरीरत्वपरा। इति।

खण्डनम् :

तदसारम्। पृथिव्यादिशब्दानामपि तदभिमानिदेवतापरत्वस्य वक्तुं शक्यत्वेन पृथिव्यादीनामपि परमात्मशरीरत्वासिद्ध्या तेषामपि तथा सति द्रव्यत्वाभावप्रसङ्गात् इत्युक्तदोषस्य तादवस्थ्यात्। परमात्मनः शरीरनिषेधश्रुतीनां प्राकृतशरीरविषयत्वं वदतस्तव मते मुख्यं शरीरत्वं न देवतानां न वा पृथिव्यादीनाम्। अमुख्यं तु वेदानामपीति वर्णानामपि द्रव्यत्वमेव।

विजयीन्द्र....विवेचनम् :

तस्य प्रकृतिलीनस्य इत्यत्र सर्ववेदप्रकृतिरोङ्कार इत्याद्यर्थं वदता त्वया वर्णेष्वपि द्रव्यत्वस्याभ्युपगन्तव्यत्वाच्च । न च तत्र प्रकृतिशब्दितोपादानत्वं गौणमिति वाच्यम् । 'मायां तु' इत्यादावपि तथात्वापातात् ।

परकालयतिः :

प्रकृतिशब्दो नोपादानात्मकः । गुणेषु परस्परमुपादानोपादेयभावायोगात् । किं तु औपचारिकः । अकारात्मकवर्णरूपशब्दगुणकवायुशरीरकत्वात् । इति ।

खण्डनम् :

तदसारम् । अन्योन्याश्रयात् । सिद्धे वर्णानां गुणत्वे प्रकृतिशब्दस्योपचारकल्पना । उपचारसिद्धौ वर्णानां गुणत्वसिद्धिरिति । वायुगुणत्वं तच्छरीरकत्वादिकं तु कपोणिगुडायितम् । एवमेवोपचारकल्पनं तु 'मायां तु प्रकृतिं' इत्यत्रापि प्रसजतीत्युक्तम् । इदं च पररीत्यैव परस्य दूषणाभिधानमिति मन्तव्यम् ।

विजयीन्द्र....विवेचनम् :

वस्तुतस्तु वर्णात्मकशब्दानां नित्यसर्वगतत्वमेव दुर्वारम् । 'वाचा विरूपनित्यया' 'यावद् ब्रह्म विष्ठितं तावती वाक्' इत्यादिश्रुतेः ।

परकालयतिः :

अनेकश्रुत्यादिबाधितार्थेष्वनिरूपकस्य एकभ्रमजनकैक-श्रुतिमात्रेण वस्तुस्वरूपान्यथाकरणायोगात् । इति ।

खण्डनम् :

तदसारम् । यावत्तावच्छब्दप्रयोगपुरस्सरं ब्रह्मदृष्टान्तेन वेदानां विष्ठितत्वरूपं सर्वदेशकालव्यापित्वं निरवकाशतया प्रतिपादयन्त्याः श्रुतेर्भ्रमजनकत्वोक्तेरेव तवैव महाभ्रममूलत्वात् । अनेकश्रुत्यादिबाधितार्थेष्वित्यादिकमपि प्रजल्पमात्रम् । 'ऋचः सामानि जज्ञिरे' इत्यादिषु त्वदुक्तश्रुतिषु यत्र क्वाप्युक्तायाः जनेः प्रादुर्भावात्मकत्वात् । अवान्तराभिमानिदेवानां शरीरजन्मविषयकत्वाद्वा । तथा हि ब्रह्माण्डे :— 'वेदानां सृष्टिवाक्यानि भवेयुर्व्यक्त्यपेक्षया । अवान्तराभिमानानां देवानां वा व्यपेक्षया । नानित्यत्वं कुतस्तेषामनित्यत्वं स्थिरात्मनाम् ॥' इति । 'एकश्रुतिमात्रेण' इत्युक्तिरपि निर्मूला । वेदनित्यत्वप्रतिपादकानां 'नित्या वेदाः समस्ताश्च' 'श्रुतिर्वाव नित्या' 'शाश्वता विष्णुबुद्धिगाः' 'वेदास्ते नित्यविन्नत्वात्' 'तत्क्रमेणैव तैर्वर्णैः तैः स्वरैरेव नान्यथा' इत्यादीनां परःशतानां प्रमाणानां जागरूकत्वात् ।

यदपि वर्णानां अद्रव्यत्वसाधनाय स्फोटनिराकरणं तदसङ्गतम् । न हि कोऽपि स्वस्थात्मा वर्णानां द्रव्यत्वसाधनाय तेषां स्फोटं प्रत्युपादानत्वमाह येन तत्सङ्गच्छेत । अद्रव्यत्वे उपन्यस्तः संयोगा-

भावहेतुश्च असिद्धः उक्तप्रमाणबाधितश्च । एवं अवस्थावत्त्वविरह-हेतुश्च । वर्णानामपि व्यक्त्यव्यक्त्यवस्थयोः प्रमितत्वात् । 'शब्द-गुणकवायुशरीरत्वादि'ति त्वदुक्तं वायुविशेषगुणत्वं तु बधिराणामपि शब्दश्रवणापत्तिप्रसङ्गपराहतम् ।

'स एवायं गकार' इति बलीयसी प्रत्यभिज्ञा तु सर्वत्र विजयते । सेयं सावधारणा श्रुतश्रूयमाणयोरत्यन्ताभेदं गोचरयन्ती त्वदुक्तमुच्चारणजन्यत्वादिकं निरवकाशतया निरुणद्धि ।

अव्याकृताकाशस्य द्रव्यान्तरत्वसमर्थनम्

विजयीन्द्र....विवेचनम् :

अव्याकृताकाशस्य द्रव्यान्तरस्य सत्त्वादुक्त-संख्याऽयोगः । न च तत्र मानाभावः । 'यावान्वा अय-माकाशः तावानेषोऽन्तर्हृदय आकाश' 'आकाशवत्सर्वगतश्च नित्यः' 'अनादिर्वा अयमाकाश' 'एवमनन्त आत्मा वेदि-तव्यः' इत्यादीनां सत्त्वात् । न च तत्राकाशशब्दः परमात्म-परः । उपमानोपमेयभावस्य भेदनियतत्वात् ।

परकालयतिः :

'प्रसिद्धस्य नासिद्धं निदर्शनं' इति न्यायेन 'अन्तर्बहिश्च तत्सर्वं' 'नित्यो नित्यानाम्' 'सत्यं ज्ञानमनन्तं' इत्यादिभिरेवानन्तत्वावगमेन

गगनकुसुमायितोपमानमुखेन उक्तधर्माणां भगवत्यनुपदेश्यत्वात् इति ।

खण्डनम् :

तत्तुच्छम् । अव्याकृताकाशस्य तदानन्त्यस्य च साक्षिप्रत्यक्षेण सिद्धत्वात् । तस्य शब्दानुमानवेद्यत्वे जातिबधिरमूकानां गगनानिश्चयेन सञ्चार एव कुण्ठितः स्यात् । तदेवं प्रमितस्य गगनकुसुमायितत्वोक्तिस्त्वदुन्मादमूलैव । संवादेन स्वोक्तस्थिरीकरणाय वेदेऽपि 'दिवीव चक्षुराततम्' इत्यदिषु बहुत्र ब्रह्मणो व्याप्त्यादिविषये निदर्शनाभिधानस्य शिलष्टत्वात् । त्वयाऽपि 'ज्योतिरिवाधूमकः' इत्यादिनिदर्शनानामुदाहरणात् । अल्पत्वनिवृत्त्यादिना धर्मेण सादृश्यपरमपीदं वाक्यं भवति इति तव वचनाच्च । अतो व्याहतमेवंविधं वचनं तिरस्करणीयमेव ।

विजयीन्द्र....विवेचनम् :

"न चैवं त्वन्मते आकाशाधिकरणे अनन्तत्वादिलिङ्गेन 'आकाशादेवे'त्यादिवाक्यस्य विष्णुपरत्वसाधनमयुक्तं स्यात्। अनन्तत्वस्य अव्याकृताकाशेऽपि सत्त्वादि"ति वाच्यम्। गुणतोऽप्यानन्त्यस्यानन्तशब्दार्थत्वेन तेन तस्य विष्णुपरत्वनिर्णयसंभवात्। परोवरीयस्त्वादिधर्मेण विष्णुपरत्वसिद्धेश्च।

परकालयतिः :

गुणानन्त्यरहिताकाशदृष्टान्तेन आनन्त्यप्रकारमतिदिशता त्वदुदाहृतवाक्येन 'सत्यं ज्ञानमनन्तं ब्रह्म' इति ब्रह्मलक्षणस्य ब्रह्मण्यनन्तत्वांशे गुणेष्वसंभवसंपादनमेव फलमिति पर्यवसानात् इति ।

खण्डनम् :

तदसारम् । देशकालानन्त्यमात्रे दृष्टान्तीकृतस्य गुण-विषयेऽपि व्यापारं परिकल्प्य दूषणस्य छलोत्तरत्वात् । अन्यथा लेपाभावमात्रे निदर्शनोक्तिपरे 'यथा सर्वगतं सौक्ष्म्यादाकशं नोपलिप्यते' इत्यादिकेऽप्येवं दोषप्रसरात् ।

परकालयतिः :

हिरण्यगर्भादिषु व्यभिचरितस्य इतराप्रसिद्धस्य त्वदीयसङ्केत-मात्रसिद्धपरोवरीयस्त्वादिकस्य पूर्वपक्षिणं प्रति लिङ्गत्वेन उपन्यस-नायोगाच्च ।

खण्डनम् :

तत्तुच्छम् । परोवरीयश्शब्दः खलु सर्वोत्तमं वक्ति । स च, 'परो मात्रया तन्वा वृधान' इति भाष्योदाहृतश्रुत्या विष्णुमात्रपरः । एवं 'उद्गीयमान उद्गीथो भगवान्पुरुषोत्तमः' इति स्मृत्या विष्णुमात्रपर

एवोद्गीथशब्दः । अतः सङ्केतमात्रत्वाभावात् तल्लिङ्गयोर्व्यभिचारः अन्यतरासिद्धिर्वा न शङ्कार्हा ।

परकालयतिः :

'अनादिर्वा अयमाकाशः' इति आकाशानुत्पत्तिश्रुतिश्च 'गौण्यसंभवात्' इति सूत्रेण गौणीति त्वयैवोक्ता । अतो न साऽप्यत्र प्रमाणम् इति ।

खण्डनम् :

तदप्यसारम् । अवकाशस्यापि पराधीनविशेषलाभलक्षणोत्पत्तिरिति सर्वविषयत्वादुत्पत्तिश्रुतिर्मुख्यार्था । अनादित्वश्रुतिस्तु न सर्वविषयेति भवति गौणी इति अव्याकृताकाशस्य पराधीनविशेषावाप्तिरेव तत्रोक्ता । न तु स्वरूपत उत्पत्तिः । अतः स्वरूपत उत्पत्तिमद्भूताकाशापेक्षया भिन्नस्य अतादृशस्य अव्याकृताकाशस्य सद्भाव एतच्छ्रुत्युदाहरणं युक्तमेव ।

यत्तु प्रमाणसिद्धस्याप्यव्याकृताकाशस्य प्रयोजनाभावव्युत्पादनेन पराकरणं तदप्यसारम् । प्रमाणाधीनत्वादेव प्रमेयसिद्धेः ।

अन्धकारस्य द्रव्यान्तरत्वसमर्थनम्

विजयीन्द्र....विवेचनम् :

अन्धकारस्य न पृथिव्यामन्तर्भावः । निःस्पर्शत्वात् । न च नीलप्रभासहचरितनीलभागवदेव पृथिवीरूपतेति वाच्यम् । इन्द्रनीलप्रभायामेव नैल्यसंभवेन तादृशनीलभागस्याकल्पनीयत्वात् ।

परकालयतिः :

तमो द्रव्यमेव तच्च पृथिव्यामेवान्तर्भवति । न च निःस्पर्शत्वान्न तदन्तर्भाव इति वाच्यम् । अप्रयोजकत्वात् । परमते परमाणूनां मन्मतेऽप्यतिसूक्ष्मत्र्यणुकानां पार्थिवानां निःस्पर्शत्वात् इति ।

खण्डनम् :

तत्तुच्छम् । परमते परमाणूनां पार्थिवानां निस्पर्शत्वादित्ययमसदनुवादः । न हि पार्थिवपरमाणूनां निःस्पर्शतां परोऽभ्युपैति ॥ 'मन्मतेऽपि अतिसूक्ष्मत्र्यणुकानां निःस्पर्शत्वमि'ति च व्याहतम् । योग्यानुलम्भेन खलु स्पर्शाभावः साधनीयः । न अनुपलम्भमात्रेण । तथा सति परमाण्वादीनामेवासिद्धिप्रसङ्गात् । न चात्रोपलम्भे योग्यता अस्ति । अतिसूक्ष्मत्वादिति त्वयैव तन्निरासात् । समर्थानां तु अस्त्येवोपलम्भः । किं च उपादानोपादेययोरत्यन्ताभेदवादिन-

स्तव मते, त्र्यणुकानां निःस्पर्शत्वे तदुपादेयानां पार्थिवमात्राणां निःस्पर्शत्वप्रसङ्गः ।

परकालयतिः :

ममैवं प्रतिभाति सन्तमसस्य निःस्पर्शनत्वं निःस्पर्शाकाशेन संहतिसमागमवत्पृथिव्यंशत्वात् । इति ।

खण्डनम् :

तदप्यसारम् । त्वदुदाहृतसंहतिसमागमप्रक्रिया कारणानां एव मिश्रतामेवावलम्बमाना न कार्याणां अन्योन्यं धर्मसंक्रमणं व्यवस्थापयति । तथा सति आकाशसमागमेन तमसः निःस्पर्शत्वमिव त्वद्रीत्या पार्थिवतमःसंहतिसमागमेन आकाशस्यैव स्पर्शवत्त्वमिति वैपरीत्यं कुतो न स्यात् ।

परकालयतिः :

अतो बाधकविधुरप्रत्यक्षसहकृतपरिशेषादेव अत्र पृथिव्यंशोऽन्धकारः । अत एव इन्द्रनीलमणिप्रभासहचरितनीलभागोऽपि पृथिव्यंश एव इति ।

खण्डनम् :

तदप्यसारम् । प्रत्यक्षं हि तमसः न पृथिवीत्वं आवेदयति । बाधकवैधुर्यं चासिद्धम् । आलोकनाश्यत्वं, प्रलयकालीनाव-

स्थितिमत्त्वं, सर्गादौ विरिञ्चिपीतत्वं, गन्धशून्यत्वं, निःस्पर्शत्वं इत्याद्यनेकेषां बाधकानां सत्त्वात् ।

मणिप्रभासहचरितो नीलभाग इति च निर्मूला कल्पना। मणिप्रभायामेव नैल्यसंभवादित्युक्तत्वात् । न च 'यत्कृष्णं तदन्नस्य' इति श्रुतिबलात्तद्भागस्य, तस्य पृथिव्यंशत्वस्य च सिद्धिः । पृथिवी-वैलक्षण्यस्य पूर्वोक्तप्रबलबाधकप्रमाणसिद्धत्वेन श्रुतेरुत्सर्गमात्र-विषयकत्वात् । नैल्यस्य प्रभासहचरितनीलभागगतत्वे न तस्य मण्यनुविधानं संभवति । न वा निःस्पर्शत्वम् ।

अखण्डकालखण्डनम्

विजयीन्द्र....विवेचनम् :

क्षणलवाहोरात्रमासर्तुसंवत्सरादिसूक्ष्मखण्डकाल-व्यतिरेकेण अखण्डः कालो नाभ्युपेयः । प्रमाणाभावात् ॥ न च 'कालं स पचते तत्र न कालस्तत्र वै प्रभुः' — इत्यादि-प्रमाणं तत्रेति वाच्यम्, सूक्ष्मकालविषयत्वेनैव तेषामुपपत्तेः ।

परकालयतिः :

'अनादिर्भगवान्कालः नान्तोऽस्य द्विज विद्यते' इत्यस्यैव तत्र प्रमाणत्वात् । न ह्यनादित्वानन्तत्वैकत्वानि क्षणपक्षमासादिषु संभवन्ति । इति ।

खण्डनम्ः

तदसारम्। उदाहृतवाक्यस्य कालनामकभगवत्परत्वात्। प्रसिद्धकालपरत्वेऽपि न त्वदभिमतातिरिक्ताखण्डकालपरत्वम्। तज्ज्ञापकाभावात्। अनन्तत्वादीनि विशेषणानि कालप्रवाहपराण्येव। एतेन 'नदीव प्रभवा काचिदि'त्यादिवाक्योदाहरणमपि प्रत्युक्तम्। एवं तत्रत्यसंवत्सरशब्दस्य क्लेशेनाखण्डकालपरत्ववर्णनमपि। तस्य कालप्रवाहाविच्छेदपरत्वेन त्वदभिमते प्रमाणत्वायोगादित्युक्तत्वात्। यच्चात्र 'अथ ह वाव नित्यानि पुरुषः प्रकृतिरात्मा काल' इति भगवत्पादीयभाष्योदाहृतश्रुत्या क्षणाद्यनित्यकालातिरिक्तनित्यकालोऽपि सिद्ध इति तव वचनं तदनुमतमेव। प्रवाह्यतिरिक्तस्य नित्यस्य च कालप्रवाहस्य यथाप्रमाणमभ्युपगमात्। प्रवाहप्रवाहिणोरत्यन्तभेदस्तु त्वदभिमतः प्रमाणविरुद्धो नोपेयते। अंशांशिनोरभेदस्यापि तत्र स्वीकारात्। न च तत्र प्रमाणाभावः। 'कलामुहूर्तादिमयश्च काल' इति त्वदुदाहृतवाक्यस्यैव तत्र प्रमाणत्वात्। तत्र मयटा अभेदबोधनात्। न च भेदाभेदयोरेकत्र विरोधः। प्रमिते तदनवकाशात्।

अवयवावयविनोरत्यन्ताभेदः खलु तव सिद्धान्तः। तस्य तव कालावयवानां अवयविनः कालप्रवाहस्य चात्यन्तभेदवर्णनं कथं न स्वव्याहतम्।

स्वरूपातिरिक्तधर्मभूतज्ञानखण्डनम्

विजयीन्द्र.... विवेचनम् :

किं च धर्मभूतज्ञानशब्देन अन्तःकरणपरिणामरूपवृत्तिज्ञानोक्तौ तस्य प्राकृतत्वेन द्रव्यान्तरत्वायोगः। तद्व्यतिरिक्तं जीवेश्वरस्वरूपातिरिक्तं नित्यज्ञानं नास्त्येव। प्रमाणाभावात्।

परकालयतिः :

संसृतिमोक्षगतसङ्कोचविकासयोः स्वरूपव्यतिरिक्तनित्यधर्मज्ञानमन्तरेणानुपपत्तेः। स्वरूपस्यैव सङ्कोचे अन्यप्रकाशत्वापत्तिः।......। स्वरूपस्यैव विकासे तन्नाशोऽप्यवर्जनीय इति मुक्तेरपुरुषार्थता अनित्यता च स्यात्। जीवस्य अणुत्वश्रुतिभङ्गश्च। इति।

खण्डनम् :

तदसारम्। सङ्कोचविकासाभ्यां आक्षेप्यं नित्यधर्मज्ञानं न तावत्प्राकृतम्। मुक्तावनुवृत्तेः। द्रव्यान्तरत्वायोगेन षाड्विध्यभङ्गापत्तेश्च। अप्राकृतमपि चेतनं अचेतनं वा। न द्वितीयः। त्वदभिमतस्वप्रकाशत्वानुपपत्तेः। आद्यं तु स्यात्। न च तथा सति तस्य जीवेश्वरस्वरूपातिरेकः संभवति इति पुनः द्रव्याणां षड्विधत्वानुपपत्तिरेव।

यदत्रोक्तं,:—

"न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वात्' । 'तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते' इत्यादिकं नित्यधर्मज्ञाने प्रमाणम् ।" इति तदपि हेयम् । 'न हि द्रष्टुर्दृष्टेरि'ति श्रुतेरीश्वरस्वरूपपरत्वात् । 'तथे'ति स्मृतेश्च जीवस्वरूपस्य साक्षिताऽऽदिनित्यत्वप्रतिपादनपरत्वमेव ।

परकालयतिः :

'न हि दृष्टेः' इति श्रुतिर्मुक्तपरैव । ईश्वरे तस्य नित्यधर्मज्ञानस्य कदाऽपि विपरिलोपाप्रसक्तेः ।..... । जीवस्य नाशः धर्मभूतज्ञानस्य सम्यक्तिरोधानमेवेति ।

खण्डनम् :

तदसारम् । विपरिलोपशब्दस्य न नाशः अर्थः । किं तु बाध एव । स च ईश्वरदृष्टेः कुसमयादिप्रसक्तः । तवैवाप्रसक्तप्रतिषेधो दोषः । जीवस्य नाशस्य अप्रसक्तेः । भिन्नस्य धर्मस्य तिरोधानेन जीवस्य नाशोक्तिः असङ्गतैव । अभिन्नत्वे तन्नाशेन तन्नाशो दुष्परिहरः । त्वयैव 'चिद्गुणस्य स्वरूपत्वात्' इति स्कान्दवचनं, 'प्रभावतः प्रभेव चिद्गुणाख्यं धर्मज्ञानं धर्मिणः स्वरूपं वक्ती'ति कथितत्वेन, श्रुत्यन्यथाऽर्थवर्णनमयुक्तमनुपयुक्तं च ।

या तु 'अविरोधश्चन्दनवदि'ति सूत्रस्य वस्तुस्थित्यननुगुणत्वोक्तिः सा परतत्त्वप्रद्वेषस्वभावविजृम्भितेति तिरस्कार्यैव । न खलु

'गुणाद्वाऽलोकः' इति उत्तरसूत्रस्थः पक्षान्तरसमुच्चयपरः वाशब्दः पूर्वसूत्रस्य सूत्रकृदनभिप्रेतार्थपरतां सहते । मनोवृत्तिज्ञानस्वरूप-निराकरणं 'सर्वं मन एव' इति श्रुतिविरुद्धम् । एवकारेण त्वदभिमत-नित्यधर्मज्ञानस्य निराकरणात् ।

अण्डाद्बहिर्भूतशुद्धसत्त्वरूपद्रव्यखण्डनम्

विजयीन्द्र....विवेचनम् :

नित्यविभूतिरूपं अण्डाद्बहिर्भूतमप्रमाणकं देशमात्रस्य मूलप्रकृतिव्याप्तत्वात् ।। 'महान्तं च समावृत्य प्रधानं समवस्थितम् । अनन्तस्य न तस्यान्तः संख्यानं वाऽपि विद्यते । तदनन्तमसंख्यातप्रमाणं चापि वै मतम् ।' इत्यादिना प्रकृत्यानन्त्योक्त्या तत्सिद्धेः 'तमसः परस्तात्' इत्यादिकाश्च श्रुतयः ब्रह्मणः प्रकृत्यवश्यत्वप्रतिपादनपराः । न तु प्रकृत्यतिरिक्त-स्थानविशेषसद्भावनिर्धारणपराः । अतः अण्डाद्बहिर्भूतशुद्ध-सत्त्वाख्यद्रव्यस्याप्रमाणकत्वात् न तमादाय द्रव्य-षाड्विध्योक्तिर्युक्ता इति ।

परकालयतिः :

तिमिरतेजसोरिव अतिविरुद्धस्वभावयोः प्रकृतिशुद्धसत्त्वयोः अन्योन्यव्यापनासंभवात् । प्रसिद्धा हि प्रकृतिः जडत्वेन बन्धकत्वेन

च ।..... । *शुद्धसत्त्वं तु एवमुक्ताकारविरुद्धाकारतया शास्त्रसिद्धं इति ।*

खण्डनम् :

तदसारम् । विरुद्धस्वभावयोः सहानवस्थानमिति नास्ति नियमः । परमात्मनो जगद्व्यापित्वाभावप्रसङ्गात् । सामर्थ्यविशेषात्तस्य लेपाभावश्चेन्मुक्तानामपि तदनुग्रहसामर्थ्यादिवेत्यवेहि । यत्तु कालस्य प्रकृतितत्कार्यभिन्नत्ववचनं तदप्यप्रामाणिकमेव । अत एव भागवते 'न च कालविक्रमः' इति मुक्तौ कालादीनां अबन्धकत्वमेवोक्तम् । न पुनस्तस्याप्राकृतत्वम् । एवं 'न कालः तत्र वै प्रभुः' इति त्वदुदाहृतमोक्षधर्मवचनेऽपि ।

'महान्तं च समावृत्य' इत्यादिप्रमाणोक्तं प्रकृतेरानन्त्यं सङ्कोचनीयमिति त्वदुक्तिरत एव निर्मूला । अभ्यासेन निरवकाशतयोक्तस्य संकोचासंभवात् । त्वदुक्तबाधकस्य च परिहृतत्वात् ।

'तमसस्तु पारे' इत्यत्र तमःशब्दोऽन्धकारपर एव न तु त्वदुक्तरीत्या प्रकृतिपर इति न तद्विरोधोऽपि ।

सत्त्वादेर्द्रव्यत्वसमर्थनम्

विजयीन्द्र....विवेचनम् :

'सत्त्वं खल्वीरितं विषमत्वं प्रयाति रजः खल्वीरितं विषमत्वं प्रयाति तमः खल्वीरितं विषमत्वं प्रयाति' इति सत्त्वरजस्तमसामपि ईश्वरप्रेर्यत्वावस्थायोगित्वयोः प्रतिपादनात् न अद्रव्यत्वमिति ।

परकालयतिः :

यथा आमघटनिष्ठं कुलालेरितरूपरसगन्धस्पर्शादिकं पाकेन विषमत्वं प्रयातीत्युक्तिः शब्दादेः साक्षात्प्रेर्यत्वावस्थायोगित्वनिबन्धनद्रव्यत्वं न संपादयति किं तु तदुभययोगिनि घटे तद्गुणभूतरूपाद्यन्तरसंबन्धितामेव बोधयति तथा सत्त्वं खल्वीरितं इत्याद्यपि प्रकृतेरेवावस्थाऽन्तरयोगित्वं इति ।

खण्डनम् :

तत्तुच्छम् । विषमोऽयमुपन्यासः । न हि कुलालः रूपादिगुणमीरयतीति कोऽपि व्यवहरति । नापि रूपं विषमावस्थां प्रयातीति । अत्र पुनः सत्त्वादीनामेव साक्षात्प्रेर्यत्वं वैषम्यावस्थाप्राप्तिश्चोच्येते । गुणानां साम्यावस्था प्रलयः वैषम्यावस्था च सृष्टिः इत्येव शास्त्रीयव्यवहारः । 'द्वितीया प्रकृतिः प्रोक्ता तद्रूपा हि गुणास्त्रयः' इति

(भा.द्वि.ता.) प्रमाणेन सत्त्वादिगुणानां प्रकृतिस्वरूपत्वोक्त्या च तेषां द्रव्यत्वसिद्धिः ।

किं च सत्त्वादीनामद्रव्यत्वे, 'निबध्नन्ति महाबाहो' इत्युक्तबन्धकत्वं 'ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत' इत्युक्तं आवरकत्वं 'कारणं गुणसङ्गोऽस्य' इति उक्तं संयोगित्वं 'प्रकृतिसंभवाः' 'प्रकृतिजैर्गुणैः' इत्युक्तमुपादेयत्वं, 'गुणानेतानतीत्य त्रीन्' इत्युक्तमत्ययनकर्मत्वं, महत्तत्त्वं प्रत्युपादानत्वं इत्यादिकं तत्र तत्रोक्तमयुक्तं स्यात् । न च वाच्यं प्रकृतेरेवावस्थाविशेषो महत्तत्त्वं न गुणत्रयोपादानकमिति । एवं तर्हि तूलस्यैवावस्थाविशेषो वस्त्रं न तु तन्तूपादानकमित्याद्यतिप्रसङ्गात् । अतो यत्किंचिदेतत् ।

उपादानातिरिक्तोपादेयसमर्थनम्

विजयीन्द्र....विवेचनम् :

उपादेयमुपादानातिरिक्तम्। प्रत्यक्षस्यैव तत्र प्रमाणत्वात्। अस्ति तावत् स्थूलं नीलमेकं साक्षात्करोमीति प्रतीतिः। न चैवं भूतसूक्ष्मेषु अनुद्भूतरूपेषु अनेकेष्वतीन्द्रियेषु च भवितुमर्हति । न वा नीरूपायां प्रकृतौ। घटस्य कपालाद्युपादानकत्वेऽपि तेषामप्यन्ततः प्रकृतिकारणकत्वात् उक्तदोषानिस्तारात् घटगतैकत्वोपपादकस्य कस्याप्यभावात्।

परकालयतिः :

श्रुतिस्मृत्यादिषु उपादानानतिरिक्तत्वस्यैव तदुपादेयेषु निरङ्कुशं श्रूयमाणत्वात् इति ।

खण्डनम् :

तत्तुच्छम् । प्रत्यक्षविरुद्धार्थे श्रुत्यादीनामनवकाशात् । न सन्ति चानतिरिक्तत्वप्रतिपादिकाः श्रुतयः । त्वदुदाहृतासु सर्वत्र भेदस्य प्रतिपादनात् । तथा हि । 'सदेव सौम्येदमग्र आसीत्' इत्यत्र सदिदंशब्दयोर्न सामानाधिकरण्यम् । येन इदंशब्दार्थप्रपञ्चेन सच्छब्दार्थब्रह्मणोऽभेदकल्पनाऽवकाशः । सामानाधिकरण्येऽपि इदंशब्दार्थो ब्रह्मैवास्तु । तस्यापि बुद्धिसन्निधानात् । प्रपञ्चार्थत्वेऽपि 'यदधीना यस्य सत्ता' इति न्यायेन प्रपञ्चो ब्रह्माधीनसत्ताक इत्यर्थः अस्तु । उपादानोपादेयभावनिबन्धनं सामानाधिकरण्यमिति तु निर्मूलमेव । 'स्थूलोऽहं' 'तत्त्वमसि' इत्यादिके त्वयाऽपि तथाभावानङ्गीकारादेव ।

'येनाश्रुतं श्रुतं भवति' इत्यादिकं, प्रधानज्ञानेन अप्रधानं ज्ञातफलं भवतीत्येतदर्थकम् । न तु पुनरुपादानोपादेयभावोक्त्याऽभेदपरम् । दृष्टान्तानानुगुण्यादेव । न हि एकं मृत्पिण्डं सर्वेषां मृण्मयानां घटशरावोदञ्चनादीनामुपादानम् । न वा तेषां मृत्पिण्डेनैकेनाभेदः । अर्थक्रियादिभेदस्य सुस्फुटमुपलम्भात् ।

यदप्युक्तं तदेवेदमिति उपादाने उपादेयप्रत्यभिज्ञा सर्वसंमता इति तदपि न चारु। सर्वोऽपि मृत्तिका घटात्मना परिणता इत्येव जानाति। न तु पुनः मृत्तिकैव घट इति कोऽपि स्वस्थात्मा प्रत्यभिजानाति। विलक्षणशब्दव्यवहार्यत्वं कार्यभेदः, कालभेदः, आकारभेदः, सत्यामेव मृदि घटस्य नाशः, संख्याभेदः, कारकव्यापारवैय्यर्थ्यं इत्यादीनां उपादेयस्योपादानाद्भेदं विना अनुपपत्तेः। न चैतेषां, तदनन्यत्वनये त्वद्भाष्यकृदुक्तरीत्या, उपादानस्यैव संस्थानान्तरभाक्त्वमात्रेणोपपत्तिः। एवं सति जीवेश्वराव्यक्तकालादीनामपि विरुद्धधर्मयोगित्वेन भेदो न सिध्येत्। त्वन्मते प्राकृततमःप्रकाशदहनतुहिनादिष्वपि एवं संस्थानान्तरभाक्त्वमात्रेण विरुद्धधर्माधिकरणत्वोपपत्तिवचनसौलभ्येन भेदवार्तैव सर्वत्रोच्छिद्येत। यद्यदभिन्नाभिन्नं तत्तदभिन्नमिति न्यायेन उपादानप्रकृत्यभिन्नयोः तमःप्रकाशयोरभेदस्यावर्जनीयत्वात्।

परकालयतिः :

प्रपञ्चान्तर्गतयावज्जन्यपदार्थेषु उत्तरक्षणावस्थं प्रति पूर्वक्षणावस्थत्वेनोपादानतया कारणभूतेषु क्षणभेदेन भेदाभ्युपगमे तेष्वेकत्वग्राहिप्रत्यभिज्ञाविरोधः इति।

खण्डनम् :

तदप्यसारम्। सर्वत्र प्रतिक्षणं पदार्थेषु विशेषसद्भावे प्रमाणाभावात्। क्वचित्सद्भावेऽपि न प्रत्यभिज्ञाविरोधः। तत्राभेदस्या-

प्यभ्युपगमात् । न तावता तवेष्टसिद्धिः । त्वदभिमतायाः सावधारणायाः 'स एवायं देवदत्तः' इत्याद्यत्यन्ताभेदविषयिण्याः प्रत्यभिज्ञाया अनङ्गीकारात् । परिणामवादे भेदस्याप्यङ्गीकारात् । निरन्वयविनाशानङ्गीकारेण न त्वदापादितक्षणिकवादाविशेषापत्तिश्चेति दिक् ।

परकालयतिः :

अत एवोक्तं सूत्रकृता 'तदनन्यत्वमारंभणशब्दादिभ्यः' इति । तद्विषया श्रुतिरपि च 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति । इति ।

खण्डनम् :

नेमे श्रुतिसूत्रे ब्रह्मजगतोरुपादानोपादेयभावं तयोरभेदं वा ब्रुवाते । अक्षरानानुगुण्यादेव । सूक्ष्माव्यक्तादिविशिष्टस्य कारणस्य ब्रह्मणः स्थूलमहदादिविशिष्टेन कार्येण ब्रह्मणाऽनन्यत्वमत्रोच्यते इति हि त्वदीयभाष्यार्थः । न तद्युक्तम् । शुद्धाचेतनात्मकस्य विशिष्टरूपकार्यगतस्य विशेषणांशस्य महदादेर्विशिष्टचेतनकार्यत्वाभावेन विशिष्टब्रह्माभेदाभावात् 'इदं सर्वं यदयमात्मा' 'सर्वं खल्विदं ब्रह्म' इत्यादि श्रुत्यनिर्वाहात् । सर्वान्तर्यामित्वादिनैव तन्निर्वाहे च किं विशिष्टाभेदव्युत्पादनेन ॥

किं च, विशिष्टकार्यत्वे 'तत्सृष्ट्वा तदेवानुप्राविशदि'त्याद्ययुक्तम् । स्वविशिष्टे स्वानुप्रवेशायोगात् ।

यच्चोक्तम् :— श्रुतौ 'वाचारंभण'मित्यारभ्यते आलभ्यते स्पृश्यते इत्यारंभणं इति व्यस्तं पदम् । तथा च विकारो घटादि नामधेयं च वाचा वाक्पूर्वजलाहरणादिव्यवहाराय मृद्द्रव्येण स्पृश्यते । एवं च मृद्द्रव्यमेव व्यवहाराय विकारादिभाग्भवतीति श्रुत्यर्थ इति तन्न । श्रुतौ वाक्प्रातिपदिके लक्षणायाः तृतीयाविभक्तौ चतुर्थ्यर्थतायाः आरंभणशब्दे रलयोरभेदेनालंभनार्थतायाः नामधेयमित्यत्र चशब्दाध्याहारस्य मृद्द्रव्येणेत्यस्याध्याहारस्य चायोगात् । मृद्द्रव्येण घटादेः स्पृश्यमानत्वोक्त्या तयोर्भेदस्यैवापाताच्च । मद्रीत्या सूत्राणां साक्षाद्ब्रह्मविषयत्वे संभवति लौकिककुंडलहिरण्मयत्वादिमात्रविषयत्वं न युक्तम् ।

'सैव मृदयं घटः' इति सावधारणप्रत्यभिज्ञा तु नास्त्येवेत्युक्तम् ।

यदत्रास्मद्भाष्यार्थास्वारस्यसाधनमुपक्रम्य बह्वसंबद्धं प्रलपितं तदप्रस्तुतं अकाण्डताण्डवायितं असदनुवादात्मकं आत्मनोऽज्ञानातिशयमेवाविष्करोति । न हि तत्र विश्वं ब्रह्मानन्यदित्युक्तं येन त्वदुक्तदोषप्रसरः । किं नाम स्वतन्त्रकारणं ब्रह्मणोऽनन्यदित्येव । 'किंस्विदासीदधिष्ठानमि'त्यत्र किंशब्द आक्षेपार्थक इति भाष्ये स्पष्टमुक्तत्वेऽपि तत्र प्रश्नार्थो वा वितर्कार्थो वा कुत्सितार्थो वेति विकल्पः तवैव कुत्सितत्वं ज्ञापयति ।

स्वतन्त्रसाधनसापेक्षमित्यत्र स्वातन्त्र्यं कर्त्रनधीनसत्तादिमत्त्वम् । यदा मृदादिकं कुलालानधीनसत्ताकं तथा महदादिकमपि

ईश्वरानधीनसत्ताकं इति युक्तिप्राप्तस्यात्र निषेधान्नैवात्र त्वदुक्ताप्रसक्तनिषेधशङ्काऽवकाशः ।

विजयीन्द्र....विवेचनम् :

अवयवातिरिक्तावयव्यनङ्गीकारे घटोऽयं पटोऽयमित्यादिप्रत्यया निरालम्बनाः स्युः । . . . . . । कपालतन्तुरूपत्वोपगमात् । तावतामवयवानामिन्द्रियसन्निकर्षाभावात् । तथाच घटपटाद्येकदेशप्रतीतिरेव स्यात् न घटपटादिप्रतीतिः ।

परकालयतिः :

मन्मते इन्द्रियसन्निकृष्टसंस्थानविशेषविशिष्टकपालद्वयस्यैव घटबुद्ध्यालम्बनत्वात् । इति ।

खण्डनम् :

तदसारम् । न हि कपालद्वयस्यापि यावदवयवाः इन्द्रियेण सन्निकृष्यन्ते । न वा कतिपयावयवानामेव घटाभेदः त्वन्मते । येनोक्तदोषनिस्तारः । कतिपयावयवयाप्रतीतावपि अवयविप्रतीतिः भेदेन वा विशेषेण वा निर्वाह्या । न च तदुभयं त्वया स्वीकृतम् । मम तु उक्तस्थले भेदाभेदाभ्युपगमेन सर्वोऽपि निर्वाहः सुलभः ।

अत एव भेदाभ्युपगमे मूर्तानां समानदेशताविरोधाभावः गुरुत्वान्तरकार्यादर्शनादिकं च मन्मते अभेदाङ्गीकारेण भविष्यति । संयोगप्राप्त्यभावाश्चात्यन्ताभेदाभावादुपपत्स्यन्ते ।

उपादानोपादेययोर्निर्विशेषात्यन्ताभाववादिनस्तु तव, सत्कार्यवादिनः सांख्यस्येव, अपर्यायशब्दभेदः द्वित्वादिसंख्याभेदः तत्तदर्थक्रियाभेदः वृत्तचतुरस्राद्याकारभेदः इत्यादीनां दुरुपपादतैव । न चावस्थाभेदोक्तिमात्रेण निस्तारः । तस्यापि भेदविशेषान्यतरेण विनाऽनुपपत्तेरेवेति दिक् ।

ब्रह्मणो जगदुपादानत्वभङ्गः

विजयीन्द्र....विवेचनम् :

ब्रह्म न जगदुपादानं निर्विकारत्वात्। यदि चिदचिद्विशिष्टमेव ब्रह्मेति तदुपादानमित्यभिमतं तदा विशिष्टं पदार्थान्तरं न वा। आद्ये तस्य विशेष्यादप्यतिरिक्ततया न कर्तुरेवोपादानत्वसिद्धिः। त्वया ब्रह्मणोऽभिन्ननिमित्तोपादानत्वाभ्युपगमात्। द्वितीयेऽपि चिदचिच्छब्दितजीवाव्यक्तादेः किं ब्रह्मशब्दार्थान्तर्भावोऽभिप्रेतः उत तद्बहिर्भावः। न द्वितीयः। ब्रह्मशब्दार्थस्य जगदुपादानत्वालाभात्। ब्रह्मस्वरूपस्य विकारमात्रशून्यत्वेन सन्ततैकरूपत्वात् । विकाराश्रयत्वेनैवोपादानत्वस्य वक्तव्यत्वात् । अन्यथा परिभाषामात्रत्वापत्तेः। नाद्यः। त्वन्मते जीवाव्यक्तकाला-

दीनां ब्रह्मणोऽत्यन्तभिन्नत्वेन तेषां तदन्तर्भावायोगात्। तेषां तच्छरीरत्वव्यपदेशो गौण एव। परमात्मनः शरीरनिषेध-श्रुतीनां त्वयाऽपि प्राकृतशरीरविषयत्वोक्तेः।

परकालयतिः :

निर्विकारत्वं न विशिष्टोपादानत्वविरोधि प्रधानभूतविशेष्य-मात्रवृत्तित्वात्। विशिष्टं तु न पदार्थान्तरम्। अनुपलम्भात्। चिद-चितोऽपि ब्रह्मशब्दान्तर्भाव एव। 'स ब्रह्मा स शिवः' इत्यादिश्रुतौ विशेषणभूतशरीरस्य ब्रह्मादिशब्दान्तर्भाववत् इति।

खण्डनम् :

तदसारम्। एवं हि यन्निर्विकारम् ब्रह्म न तदुपादानम् इत्युक्तं भवति। तथा च दत्तजलाञ्जलिर्ब्रह्मोपादानतावादः। अनेनैव न्यायेन विशेषणान्तर्भूतचितामपि ब्रह्मस्वरूपवत् निर्विकारत्वेन उपादानकोटिप्रवेशासंभव एव। अचिदंशस्योपादानत्वं त्विष्टमेव। विशिष्टं न पदार्थान्तरं अनुपलम्भात् इति यदुक्तं तदप्ययुक्तम्। हेतोरसिद्धेः। पर्वतसद्भावेऽपि अग्निमतोऽभावात्। विशिष्टस्य विशेष्यात्पदार्थान्तरत्वस्य अयावद्द्रव्यभाविविशेषणस्थले सार्व-जनीनोपलम्भविषयत्वात्। चिदचितोऽपि ब्रह्मशब्दान्तर्भाव एवे-त्युक्तिरपहसनीया। अर्थानाम् शब्दान्तर्भावस्यासंभवात्। ब्रह्मशब्दार्थान्तर्भावाभिप्रायोऽपि निर्मूल एव। न हि ब्रह्मादिशब्द-प्रवृत्तिनिमित्तभूता गुणपूर्त्यादयो धर्माः तच्छरीरत्वेन त्वदभिमते

प्रपञ्चे संभवन्ति । न हि प्रवृत्तिनिमित्तधर्माभावे तच्छब्दार्थत्वं संभवति । अतिप्रसङ्गात् । यत्र क्वापि या चक्षुरादीनां आत्मशरीरत्वोक्तिः श्रुतिषु सा तत्प्रेर्यत्वेनैव । प्राकृतशरीरस्य ब्रह्मणि श्रुत्या निरवकाशतया प्रतिषेधात् । न हि पूर्वोत्तरविरुद्धः श्रुत्यर्थो भवति । अन्यथा तत्रैव 'यः चक्षुषि तिष्ठन्' इत्यादिना आपातप्रतीतं आधेयत्वरूपमाश्रितत्वमपि ब्रह्मणोऽभ्युपेयं स्यात् । न हि चक्षुरादीनां 'एष ते आत्मान्तर्याम्यमृतः' इत्युक्तममृतत्वं संभवति । 'स ब्रह्मा स शिवः' इति श्रौतदृष्टान्तोक्तिस्त्वसंमतैव ।

यदपि लोकशास्त्रयोः शरीरसंबन्धिन्येव आत्मशब्दस्य मुख्यत्वमित्युक्तिः साऽपि कुकल्पनामात्रमूला । 'द्युभ्वाद्यायतनं स्वशब्दात्' इति सूत्रे खलु जीवप्रकृतिव्यावृत्तये आत्मशब्दो हेतूकृतः । स कथं त्वदभिमतजीवप्रकृत्यात्मकशरीरे मुख्यः स्यात् । हेतोर्विरुद्धताऽऽपातात् ।

यच्चात्र पृष्टं, वाय्वादिजीवेषु 'गौणश्चेदि'त्यादिसूत्रोक्तं नित्यत्वशुद्धत्वादिलक्षणं आत्मशब्दमुख्यार्थत्वं अस्ति न वा इत्यादि । तत्र प्रश्न एवासंबद्धः । सूत्र एव तेषां तन्निषेधेन प्रश्नस्यैवानुत्थानात् । संसारिषु मुक्तेषु वा जीवेषु चतुर्विधनाशराहित्यलक्षणनित्यत्वं बन्धात्यन्ताभावलक्षणं शुद्धत्वं च नास्त्येवेति तत्सूत्रभाष्योदाहृतप्रमाणेषु सुस्पष्टं उक्तेः ।

यदत्रोक्तम्, वनिताद्यनुभवसुखादिष्वेव तव सुखादिशब्दादिप्रसिद्धेः सुखादिशब्दानां ब्रह्मणि गौणता स्यात् आकाशप्राणादि-

शब्दानां भूताकाशादिष्वेव मुख्यत्वात् ब्रह्मणि समन्वयो न सिद्ध्येदित्यादिकं तदयुक्तम् । आनुकूल्येन वेदनीयत्वस्यैव मया सुखलक्षणत्वेनाङ्गीकारात् । अज्ञव्युत्पत्तिमवधीर्य परममुख्यवृत्त्यैव आकाशादिवैदिकशब्दानां ब्रह्मणि समन्वयाङ्गीकाराच्च । एवमीदृशं छलप्रजल्पादिकं उपेक्षणीयमेव । यच्चात्र विश्वस्य ब्रह्मशरीरत्वं वक्तुं शरीरलक्षणं त्रेधा परिष्कृतम्, यदवस्थं द्रव्यं यस्य चेतनस्य नियमेन विधेयं तत्तस्य शरीरमिति, यद्यस्याधेयं तत्तस्य शरीरमिति यद्यस्य शेषभूतं तत्तस्य शरीरमिति च तदप्यसारम् । आद्यस्य प्रसिद्धजीवशरीरे असंभवात् । न हि जीवशरीरं जीवस्य नियमेन विधेयम् । जरामरणाद्यनुपपत्तेः । अत एव न द्वितीयः । न हि शरीरं जीवस्याधेयं किं तु जीव एव शरीरस्य आधेयः । भूतले आधेयस्य घटादिकस्य भूतलशरीरत्वापत्तेश्च । न तृतीयः । मृदाद्याहरणे कुलालाङ्गभूतस्य रासभस्य कुलालशरीरत्वापत्तेः ।

किं च 'एतस्यैव सर्वे रूपमभवन्' इत्यत्र त्वद्भाष्ये 'शरीरमभवन्' तदधीनप्रवृत्तयोऽभवन् इति व्याख्याय इन्द्रियाणां मुख्यप्राणशरीरत्वं श्रुत्युक्तं औपचारिकमेवेति समर्थितम् । तेनैव न्यायेन चिदचितोर्ब्रह्मशरीरत्वमपि तथैवाङ्गीकार्यम् । न च वाच्यं तत्र प्राणस्य अचेतनत्वेन तदधीनप्रवृत्तिमत्त्वस्येन्द्रियेष्वसंभवेन अमुख्यशरीरत्वं व्याख्यातमित्युक्तमिति । सत्यमुक्तं दुरुक्तं तत् । तत्र प्राणशब्दः चेतनपर एव । इन्द्रियप्रवृत्तेरचेतनप्राणाधीनत्वासंभवात् । 'अयं वै न श्रेष्ठः' इति वाक्यशेषोक्तेन्द्रियप्रेरकदेवोत्तम-

त्वस्याचेतने प्राणेऽसंभवाच्च । अत उभयत्र शरीरत्वव्यपदेश उपचार एव । अर्धजरतीयानुपपत्तेः ।

यच्चात्र विशिष्टस्य ब्रह्मण उपादानत्वे दृष्टान्तोक्तिः जीवोऽपि स्तनन्धयो बालं प्रति स चार्भकं प्रतीत्यादि तदप्यसङ्गतम् ।

पूर्वपूर्वावस्थशरीराण्येव उत्तरोत्तरावस्थशरीराणि प्रत्युपादानानि न त्वेव चेतन इति तद्दृष्टान्तेन ब्रह्मण उपादानत्वोक्तिरसङ्गतैव ॥

यदपि ब्रह्मण उपादानत्वे 'यद्भूतयोनिं परिपश्यन्ति' इत्यादिकं प्रमाणमुपन्यस्तं तदसङ्गतम् । तत्र सर्वत्र योनिशब्दः कारणमात्रपरः । 'मम योनिरप्स्वन्तः समुद्रे' 'मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्' 'स्त्री योनिः कलहस्य' इत्यादिषु लोकशास्त्रयोः कारणमात्रे व्यवहारात् । यद्भूतयोनिमिति योनिशब्दस्तु 'योनिष्ठ इन्द्रसदने' इत्यादिप्रयोगान्नोपादानत्वे नियत इति परैरप्यङ्गीकृतम् । परमात्मनि च निर्विकारत्वेन श्रुत्यादिसिद्धे स शब्दः निमित्तकारणत्व एव पर्यवस्यति । 'निमित्तमात्रं तत्रात्मा' इत्यादिकानि प्रमाणानि उपादानतां व्यवच्छिन्दन्ति । 'यत्र भ्रमति लोहवत्' इत्युक्तायस्कान्तदृष्टान्तोऽपि उपादानत्वं न सहते ॥ 'तत्सृष्ट्वा तदनुप्रविश्ये'त्युक्तसर्जनानुप्रवेशौ उपादाने दुर्घटौ । न हि मृत्तिका घटं सृष्ट्वा तमनुप्रविशतीति संभवति । यच्च 'यतो वा इमानि भूतानि'इत्यत्र यत इति पञ्चमी 'जनिकर्तुः प्रकृतिः' इति सूत्रेणोपादानतां प्रतिपादयतीत्युक्तं तदप्यसारम् । इदं खलु सूत्रं उपादानत्वेन प्राक् सिद्धमनूद्य तस्यापादानत्वं विधत्ते ।

न त्विदंप्रथमतयोपादानत्वम् इति वृत्तिकाराणां कल्पनामूलः आशयः ।

'आकाशाद्वायुरि'त्यादावपि न एतत्सूत्रोक्तपञ्चमीबलादाकाशादेरुपादानत्वसिद्धिः । किं तु निरवकाशमानान्तरादेव । ब्रह्मवत्तेषां आकाशादीनां निर्विकारतया प्रमाणाप्रतिपन्नत्वेन तत्रोपादानत्वाङ्गीकारे प्रमाणविरोधाप्रसराच्च । सूत्रार्थस्तु वास्तवोऽग्रे विवरिष्यते ।

यच्चोक्तं 'बहु स्यामि'त्यत्र नियामकबहुरूपग्रहणं न सङ्कल्पयोग्यं व्यर्थत्वादिति तत्तुच्छम् । प्रमितस्य सङ्कल्पस्य प्रयोजनाक्षेपेण त्वया नियन्तुमशक्यत्वात् ।

न चैवं प्रजायेयेत्यस्य वैयर्थ्यम् । बहुभावसङ्कल्पस्य त्वदभिमतोत्पत्तिविषयकत्वं विनिवार्य प्रादुर्भावार्थकत्वस्थापनार्थत्वेन सार्थक्यात् । तदुक्तं परमश्रुतौ 'उत्पत्तिर्वासुदेवस्य प्रादुर्भावो न चापरः । देहोत्पत्तिस्तदन्येषां ब्रह्मादीनां तदीरणात् । देहोऽनादिहरेर्नित्यो ब्रह्मादीनामनित्यकाः । मुख्योत्पत्तिस्तदन्येषां प्रादुर्भावो हरेर्जनिरि'ति । तेजोबन्नरूपेण समष्टिरूपेण प्रजायेयेति त्वदुक्तार्थ एवोक्तश्रुतिविरुद्धोऽनादरणीयः । परमात्मनो देहस्यानादिनित्यत्वात् तेजोबन्नानामतथात्वात् । 'रूपं रूपं बहु रूपो बभूवे'ति श्रुत्यैव बहुरूपभवनस्य निर्णीतत्वेन 'संदिग्धे तु वाक्यशेषादि'ति त्वदुक्तन्यायस्यात्राप्रसरात् ।

यच्च उक्तं " 'जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इति वाक्ये तृतीया तव व्यर्था । स्वानन्वितानुप्रवेशकव्याकरणयोः सर्वशक्तस्य किं तेन करणेने"ति तत्स्थवीयः । न ह्यत्र जीवशब्देन प्रसिद्धः अल्पशक्तिर्जीवो विवक्षितः । न वा तस्य परमात्मानं प्रति करणत्वम् । किं तु जीवयतीति जीव इति व्युत्पत्त्या 'जीवो विनयिता साक्षी' इति सहस्रनामपठितो विष्णुरेव । 'जीव इति भगवतो ह्यनिरुद्धस्याख्या' इति श्रुतेः । 'विष्णुर्जीव इति प्रोक्तः सततं प्राणधारणात्' इति च ।

यदप्युक्तं "न च 'यदधीना यस्य सत्ता तत्तदित्येव भण्यते' इति स्मृतेः सच्च त्यच्चाभवदिति सामानाधिकरण्येन निर्देशोपपत्तिः । तर्हि स्थूणाद्यधीनसत्ताकेषु गुरुतरशिलामन्दिरादिष्वपि अभेद-निर्देशापत्तेः" इति । तदतितुच्छम् । किमेवं वदतः उदाहृत-स्मृतेरप्रामाण्यं अभिप्रेतं उत तन्नियमस्य व्यभिचारप्रदर्शनेनान्यथाऽर्थवर्णनम् । आद्ये साधु समर्थितं स्मृत्यपलापिन आत्मन आस्तिकत्वम् ॥ न द्वितीयः । व्यभि-चाराभावादेव ॥ न ह्यत्राधीनसत्ताकत्वं नाम बहिरेवाश्रितत्वं घटस्य भूतल इव विवक्षितम् । किं नाम 'यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया' इति श्रुत्या 'यद्यस्य जन्म निधनं स्मृतिरीक्षणं च तद्वै तदेवे'ति स्मृत्या चोक्तं सत्ताप्रतीतिप्रवृत्तिषु तदधीनत्वम् । न ह्ये-वंविधं स्थूणाधीनत्वं मन्दिरेऽस्ति येन व्यभिचारचोदनावकाशः । न च निरवकाशस्मृतेरर्थान्तरेऽवकाशोऽस्ति । राजा राष्ट्रमिति लोके

तत्त्वमसीत्यादौ वेदे स्वातन्त्र्यविशिष्टत्वस्थानमत्यैक्याभिप्रायेण सामानाधिकरण्यनिर्देशानां सुबहुलमुपलम्भात् ।

एतेन 'यन्मयं जगदि'त्युक्तसामानाधिकरण्यानुपपत्त्या उपादानत्वसिद्धिरिति परास्तम् । 'मयं प्रधानमुद्दिष्टमि'ति निर्वचनानुरोधेन ब्रह्मप्रधानकं जगदित्यर्थोपपत्तेः । कृष्णभीतः कंसः 'अपश्यत्तन्मयं जगत्' इति स्मृत्युक्तदिशा 'सर्वं समाप्नोषि ततोऽसि सर्वः' इति गीतानुरोधेन च व्याप्त्यैक्यपरत्वोपपत्तेः । न च व्याप्त्युक्तिमात्रेण शरीरित्वम् । कालाकाशयोरपि तद्भावापत्तेः । 'यतश्च' 'यतो वा' इत्यादौ पञ्चमी निमित्तकारणत्वमात्रपरेत्युक्तम् । 'जनिकर्तुः प्रकृतिरि'ति सूत्रमपि नैवोपादानतां विधत्ते । किं नाम जनेः कर्तुर्जायमानस्य या प्रकृतिः उपादानसंसृष्टमपायेऽवधिभूतं द्रव्यं तत्कारकमपादानसंज्ञं भवतीति । उदाहरणेष्वपि यच्छृङ्गादीनां शरादीन्प्रति उपादानभूतः एकदेशः तत्संसृष्टं शृङ्गाद्येकदेशान्तरं तदेव शराद्यापायावधितया कारकं भवति । प्रकृतेर्महान् महतोऽहङ्कार इत्यादिप्रयोगेष्वपि इयमेव गतिः ।

किं च भाष्यकारेण 'अयमपि योगः शक्योऽवक्तुमि'ति प्रत्याचक्षाणेनायमेवार्थः सूचितः । अन्यथा गतार्थत्वं नावक्ष्यत् । तथा सूत्रं समादधानानां वृत्तिकाराणामप्ययमेवार्थः संमत इति गम्यते । वृत्तौ पुत्रात्प्रमोदो जायते इत्यस्याप्युदाहृतत्वात् । एवं न्यासेऽपि प्रकृतिपदं 'पुत्रात्प्रमोदो जायते' इत्यादौ अनुपादानेऽप्यपादान-

संज्ञार्थमित्युक्तत्वात्। अतः सौत्रः प्रकृतिशब्दो नोपादानार्थक इति निष्टङ्कितम्।

किं च, कुतश्च यत इत्यत्र पञ्चमीत्यवधृतम्। तसेः सार्वविभक्तिकत्वात्। आत्मन आकाशादित्यनेनैकार्थत्वादिति चेन्न। तस्याः पञ्चम्या 'भुवः प्रभव' इति विशेषविहिताभिव्यक्त्यवधितार्थत्वात्।

यदप्युक्तं योनिशब्दस्यानेकार्थकत्वेऽपि यथोर्णनाभिरित्यादिदृष्टान्तैरेव अस्य स्वमुख्यार्थोपादानार्थकत्वस्फोरणादिति। तन्न। स्यादेवं कथञ्चिद्यदि दृष्टान्ता अप्युपादानार्थकाः स्युः। नैवमस्ति। तत्राप्यूर्णनाभ्यादिभिरुपभुक्तमन्नं तन्त्वादिकार्यरूपेण परिणतं भवेदित्येवार्थः। योनिशब्दः उपादानमुख्यार्थ इति च निर्मूलम्। एतेन प्रपञ्चस्य ब्रह्मणि लयोक्त्योपादानत्वसिद्धिरिति प्रत्युक्तम्। महाप्रलये परमेश्वरेण निगीर्णं महदादिकार्यं प्रधानतां गच्छति इत्येव तदर्थत्वात्।

एतेनैव ब्रह्म वनं ब्रह्म स वृक्ष आसीत् इत्यादि प्रतिवचनोक्त्योपादानत्वसिद्धिरिति कण्ठकोलाहला निरस्ताः। परब्रह्मणः स्रष्टृत्वादिना पृथगुपात्ततया तत्र ब्रह्मशब्दस्य प्रकृत्यर्थत्वात्॥

यच्चोक्तं महदाद्युपादानत्वं स्वशरीरद्वारकतामात्रेण न अमुख्यं निर्वाहकव्यवहितत्वादित्यादि तच्च जल्पमात्रम्। उपादानत्वमेव

नास्ति दूरे तस्य शरीरद्वारकत्वं इत्युक्तत्वात्। उपादाने द्वैविध्य-कल्पनं तु कपोणिगुडायितम्।

ब्रह्म अचिच्छरीरविशिष्टं इति अत्र परस्परमत्यन्तभिन्ने द्वे वस्तुनी। तत्रैकं ब्रह्म निर्विकारं जगन्निमित्तमेव। अपरं तु अचेतनं परिणामि जगदुपादानमेव इत्यङ्गीकारे नेश्वरस्य केवलनिमित्तत्व-वादिनामस्माकं कश्चिद्विवादः। उपादानत्वं तु ब्रह्मणः सर्व-प्रमाणप्रतिहतं तिरस्करणीयमेव। प्रकृत्यधिकरणसूत्राणां कुकल्पनामात्रमूलमन्यथाऽर्थवर्णनं पूर्वोक्तेनैव निपुणतया निरस्त-मिति, अलं विस्तरेण निर्दलदुर्मतविशसनेन।

पराभिमतप्रपत्तेः मोक्षसाधनत्वभङ्गः

विजयीन्द्र....विवेचनम् :

किं च भक्तिः प्रपत्तिश्चेति मोक्षसाधनं द्विविधमित्यनुप-पन्नम्। प्रपत्तेः मोक्षसाधनत्वे प्रमाणाभावात्। प्रपद्ये इत्य-स्यापि भक्तिरूपज्ञानपरत्वात्। ब्रह्मज्ञानस्य छागपशुन्यायेन त्वया भक्तिरूपज्ञानत्वाभ्युपगमात्। ज्ञानविशेषवाचित्वेन प्रपत्तेरुपायान्तरत्वे मननेऽपि तथाभावाभ्युपगमप्रसङ्गात्।

परकालयतिः :

प्रपत्तौ औपनिषदविद्यात्वस्य 'तस्यैवं विदुषः' इत्यादिश्रुति-सिद्धत्वेऽपि भक्तिविद्यात्वं नोपेयते। 'आत्मानं युञ्जीत' इति विहिता

आत्मार्पणरूपा प्रपत्तिर्न भक्तिः। अस्याः क्षणमात्रसाध्यत्वेन आवृत्तिमद्भक्तिभिन्नत्वस्य वाच्यत्वात् इति।

खण्डनम् :

तन्न। प्रपत्तौ औपनिषदविद्यात्वाङ्गीकारे त्रैवर्णिकेतरेषां तत्र त्वदभिमताधिकाराभावापातात्। 'भक्त्यादौ शक्त्यभावः प्रमितिरहितता शास्त्रतः पर्युदासः। कालक्षेपाक्षमत्वं' इति श्लोकेन शक्तिः, ज्ञानं, शास्त्रापर्युदस्तत्वं, कालक्षेपक्षमत्वं इति चतुर्णां अभावात्मकः पञ्चदशविधाधिकारः खलु त्वया प्रपत्तौ कथितः। प्रमितिरहितस्य प्रपत्तौ अधिकारं ब्रुवन् पुनः तस्या औपनिषदविद्यात्वं व्याचक्षाणः कथं न व्याहतभाषी भवेः। 'ब्रह्मणे त्वा महसे ओमित्यात्मानं युञ्जीत' इति त्वदुदाहृतमन्त्रप्रतिपाद्यप्रणवानुसन्धानपूर्वकन्यासविद्यायां प्रपत्तौ स्त्रीशूद्रादिसर्ववर्णसाधारणाधिकारो नैव जाघटीति। 'द्वे विद्ये वेदितव्ये' इत्यत्र विद्याशब्दस्त्वया ज्ञानपरतयैव व्याख्यातः।

'तस्यैवं विदुषो' इत्युत्तरानुवाके प्रतिपाद्यमाना पुरुषविद्या प्रकृतब्रह्मविद्याङ्गभूतैवेति श्रुतप्रकाशिकायां तदर्थचिन्ताप्रदर्शनपूर्वकं सिद्धान्तितम्। अवश्यं च त्वयाऽपि प्रपत्तेर्भक्त्यङ्गत्वमेष्टव्यम्। अन्यथा 'तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते' इत्यत्र वेदनशब्दस्य छागपशुन्यायेन भक्तिरूपज्ञानविशेषे विश्रान्तिरिति त्वयाऽङ्गीकृतत्वेन तत्रान्यनिषेधोऽसङ्गतः स्यात्।

"यदुक्तं 'तस्यैवं विदुष' इति पुरुषविद्या न्यासविद्याङ्गं स्तुतिपरे"ति तदसत्। गुणोपसंहारपादे तस्या भेदाभेदचिन्तनस्यासङ्गतत्वापातात्। 'आत्मानं युञ्जीत' इति त्वदभिमतन्यासविद्याया अधिकरणसारावल्यां पाक्षिकतया भक्तिविधित्वस्योपपादितत्वाच्च। 'तदुपपादनं मदेकदेशिनं प्रत्येव न परं प्रति' इति त्वदुक्तेः दुराग्रहमात्रमूलत्वात्।

यदुक्तं प्रपत्तिः भक्तिवत् भगवद्वशीकरणसमर्था तथा मोक्षोपायतया विहिता साक्षात्तदुपायभावार्हा च। 'भक्त्या परमया वाऽपि प्रपत्त्या वा महामते। प्राप्योऽहं' इति भगवद्वचनात्सुधायामपि भगवत्प्रसादस्य गुणोत्कर्षादिज्ञानसाध्यत्वोक्तेः 'मुमुक्षुर्वै शरणमहं प्रपद्ये' इति मोक्षोपायतया विहितत्वात् फलसंयोगश्रवणेन भक्त्या तुल्यविकल्पदर्शनाच्चेति तदप्यसारम्। त्वदुदाहृतवाक्ये भगवत्प्राप्तिहेतुतया कथिता प्रपत्तिः परमभक्त्यङ्गभूतोपासनाङ्गपरा न तु त्वकल्पितसकृदनुष्ठेयशुष्कशरणागतिपरा। रामानुजाचार्यैरपि 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' इति श्लोकव्याख्याने तथा 'न मां दुष्कृतिनो मूढाः प्रपद्यन्ते' इति श्लोकावतारिकायां तथा 'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज' इति चरमश्लोकावतारिकायां च प्रपत्तेर्भक्त्यङ्गत्वमेवोक्तम्। श्रीन्यायसुधा तु त्वत्प्रतिकूलैव। तत्र परमभक्तिरेव परमप्रसादद्वारा मोक्षजननीति समर्थनात्। विकल्पोक्तिस्तु 'ब्रह्मज्ञानेन वा मुक्तिः प्रयागमरणेन वा। अथवा कार्तिके मासि दिनत्रयनिषेवणात्' इत्यत्रेव अङ्गाङ्गिभावं बोधयति। तेन उपायानां नैव तुल्यता-

सिद्धिः। अन्यथा 'भक्त्यैव तुष्टिमभ्येति हरिर्नान्येन केनचित्' 'नान्यः पन्था अयनाय विद्यते' 'प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनम्' 'एकभक्तिर्विशिष्यते' 'सुदृढः। स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा' 'भक्त्येकलभ्यः पुरुषोत्तमोऽसि' इत्येवमादीनि भक्तीतरसाधनानां मोक्षोपायत्वनिषेधपराणि निरवकाशप्रमाणानि परःसहस्राणि व्याकुप्येयुः॥ एतेन 'शरणमहं प्रपद्ये' इत्यपि व्याख्यातम्। त्वदीयभाष्यकारैरेव शरणागतेः भक्त्यङ्गत्वमेवोक्तमित्यवोचाम।

न च सा तेषामुक्तिरधिकारिविशेषविषयैवेति कल्प्यम्। निर्मूलत्वात्कल्पनायाः। एवमपि भक्तिप्रपत्त्योस्तुल्यफलताहानेरनिस्तारात्।

यदपि गुरुलघ्वोर्भक्तिप्रपत्त्योस्तुल्यविकल्पायोगमाक्षिप्यं शक्ताशक्ताधिकारेण समाहितं तदप्यपहसनीयम् । किं शक्तोऽपि प्रेक्षावान् गिर्युद्धरणशक्तिं तृणोद्धरणे जातु प्रयुङ्क्ते। 'अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्' 'मूललब्धफलो नैव शाखाऽग्रं गन्तुमिच्छति' इति न्यायविरोधस्य कः तर्हि परिहारः। शक्ततरादीनां अशक्ततरादीनां च भक्तिप्रपत्त्यतिरिक्तान्युपायान्तराणि च कुतः प्रमाणाभासान्वेषणेनायुष्मता भवता न कल्पितानि। "अथ चित्तं समाधातुं न शक्नोषि मयि स्थिराम्। अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय॥ अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव। मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि॥ अथैतदप्यशक्तोऽसि

कर्तुं मद्योगमाश्रितः । सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥" इति भक्त्यङ्गबोधनपरगीतावाक्ये त्वत्प्रक्रियामारोप्य चित्तसमाधानं, अभ्यासयोगः, भगवत्कर्मपरत्वं, सर्वकर्मफलत्यागः, इत्येतेषां प्रपत्तिवदेव शक्तितारतम्यमनुरुद्ध्य मोक्षे स्वतन्त्रोपायत्वं कुतो न भाषितम् । 'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्' इति प्रपदनपरं प्रियमर्जुनं कुतो वा गीताचार्यः क्लिष्टे घोरे युद्धकर्मणि न्ययुङ्क्त । एवं प्रपन्नं लक्ष्मणं दयालू रामचन्द्रः कुतो वनवासेनायासमास । किं तादृशानामपि महाविश्वासभासुराणां पञ्चदशसु प्रपत्तिविधासु कासुचिदपि प्रवेशो नासीदिति तव दुराशयः । त्वद्रीत्या मुक्तिफले तारतम्याभावेऽपि विषमसाधनेष्वेवं भृत्यान्व्यापारयन्तं भगवन्तं कुतो वा वैषम्यनैर्घृण्ये दोषौ न प्रादुष्येयाताम् ।

'तं प्रपद्ये स्वयम्भुवम्' इति प्रपन्ने गजेन्द्रे प्रपत्त्या परितोषमनभिधाय 'भक्त्या तुतोष भगवान्ननु यूथपाय' इति कुतो भागवताचार्योऽवादीत् । सिद्धौ तारतम्याभाव इति स्वसिद्धान्तमपि विस्मृत्य 'यस्य यावांश्च विश्वासः तस्य सिद्धिश्च तादृशी ।' इति नारदादिपरमर्षिनिरुक्तिं समुदाहरन्भवान् कथं स्वाचार्यद्रोहवान् न भवेत् । फलसंयोगश्रवणमात्रेण प्रपत्तेर्भक्तितुल्यत्वं चेत्स्यात्तर्हि 'मत्त्वा धीरो हर्षशोकौ जहाति' इत्यत्र मननस्यापि प्रपत्तिवज्ज्ञानविशेषस्य फलसंयोगश्रवणेन तदपि कुतः भक्तिप्रपत्तितुल्यतया न परिगणितम् । क्वचिन् 'न्यसनभजनयोः गौरवे को विशेष' इति तयोस्तुल्यफलत्वं वदन् तत्रैव पुनः 'शरणस्थस्य कलां नार्हन्ति षोडशीमि'ति प्रपत्तिरेव भक्तेर्गुरुभूततरेति भक्तिं कुत्सयन् 'तद्भक्तद्वेष एव च' इति नवविध-

द्वेष एव च' इति नवविधद्वेषेषु परिगणितस्य तद्भक्तिद्वेषाख्य-भगवद्द्वेषस्य भाजनं भवान्भागवतैर्बहिष्कार्यः कथं न भवेत् । 'भक्त्येकलभ्यः पुरुषोत्तमोऽसि' इति भक्तीतरस्य प्रपत्त्यादिकस्यो-पायान्तरस्य पुरुषोत्तमप्राप्तिसाधनत्वं निरवकाशतया विनिवारय-त्पञ्चरात्रवाक्यं धिक्कृत्य भक्तिभिन्नप्रपत्तेर्भगवत्प्राप्तिहेतुतां प्रजल्पन्तं आस्तिकंमन्यं भवन्तं पञ्चरात्रप्रामाण्यापलापरूपमहापापं कथंकारं नाक्रामेत् । तत्र हि 'अहङ्कारार्थकामेषु प्रीतिरद्यैव नश्यतु । त्वां प्रपन्नस्य मे सैव वर्धतां श्रीपते त्वयि' इति प्रपत्तेः भगवति प्रीतिलक्षणभक्तिवृद्धिहेतुत्वमेवाभिहितम् ॥

यदत्रोक्तं 'मामेकं शरणं व्रज' इति गीतावचनेन भक्तिविना-कृतायाः प्रपत्तेर्मोक्षहेतुत्वसिद्धिरिति तदसारम् । तत्रोक्तायाः शरणा-गतेर्लक्षणं एवं स्मर्यते —

सर्वोत्तमत्वविज्ञानपूर्वं तत्र मनः सदा ।
सर्वाधिकप्रेमयुतं सर्वस्यात्र समर्पणम् ॥

अखण्डा त्रिविधा पूजा तद्रत्यैव स्वभावतः ।
रक्षतीत्येव विश्वासस्तदीयोऽहमिति स्मृतिः ॥

शरणागतिरेषा स्याद्विष्णौ मोक्षफलप्रदा ॥ इति ।

एषा च भक्तिरूपैवेति सुस्फुटमेव ।

अतः भक्त्यनङ्गा प्रपत्तिर्मोक्षसाधनमिति वचनं असारमेव ।

मुक्तावानन्दतारतम्यसमर्थनम्

विजयीन्द्र....विवेचनम् :

किं च ब्रह्मानन्दानुभवो मोक्ष इत्यनुपपन्नम्। स्वानन्दानुभवस्यैव पुरुषार्थत्वात्। 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति श्रुतौ ब्रह्मप्राप्तिहेतुकस्वरूपानन्दाविर्भावस्यैव पुरुषार्थत्वप्रतिपादनेन 'रसं ह्येवायं लब्ध्वा आनन्दीभवति' इत्यादि श्रुतेरपि तदनुसारेण नेयत्वात्। तथा च पारमर्षं सूत्रं 'सम्पद्याविहाय स्वेन शब्दात्' इति।

परकालयतिः :

सुखानुभव एव हि ब्रह्मण आनन्दः। भूमैव हि सुखम्। तमेवानुभवतो मुक्तस्य स एवानुभवः ब्रह्मण इवानन्दः। इति।

खण्डनम् :

तत्तुच्छम्। 'स्वेन रूपेणाभिनिष्पद्यते' इति श्रुतिविरोधात्। तत्र मुक्तैराविर्भूतस्य स्वस्य स्वस्य स्वरूपसुखस्यैवानुभवोक्तेः। अन्यस्य स्वरूपसुखं अन्येन अनुभूयते इति व्याहतम्। 'तमेवानुभवतो मुक्तस्य' इत्येवकारेण पूर्वं अभेदावधारणं, पुनस्तत्रैव 'ब्रह्मण इवानन्दः' इति इवकारेण सादृश्योक्तिः इत्येते परस्परपराहते।

'एतस्यैवानन्दस्य अन्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुत्या, ब्रह्मण आनन्दस्य उपजीव्यत्वं अपरिमितत्वं, अन्येषां भूतानां आनन्दस्योपजीवकत्वं, मात्रां इत्यनेन परिमितत्वं च प्रतिपादयन्त्या त्वत्पक्षस्य प्रत्याख्यानात्। श्रुतौ अन्यशब्दः मुक्तेतरपर इति तु परस्यापि चेतसि न चकास्ति। निर्मूलत्वात्। 'मुक्ताः प्राप्य परं विष्णुं तद्भोगान् लेशतः क्वचित्। बहिष्ठान्भुञ्जते' इति विशेषवचन-विरोधाच्च।

'एतेन स च आनन्दः अन्यूनानधिक' इत्युक्तमपहस्तितम्। 'नृपाद्याः शतधृत्यन्ता मुक्तिगा उत्तरोत्तरम्। गुणैः सर्वैः शतगुणा मोदन्ते इति हि श्रुतिः' इति पाद्मपुराणवचनं चात्रानुसन्धेयम्। परस्परमपि मुक्तानां साम्यं नास्ति किमुत परमात्मनेति कैमुत्यन्यायः अत्र सूचितः। इति हि श्रुतिरिति व्याचक्षाणः पुराणकृत् स्वोक्तार्थे 'युवा स्यात्' 'स यो मनुष्याणां राद्धः' इत्यादिश्रुतीः सम्मतित्वेन दर्शयति॥ तेन च उक्तश्रुतयः संसारिमात्रपरा इत्यपव्याख्यानमपि प्रत्याख्याति।

परकालयतिः :

एवमैन्द्रियकविषयभोगस्य ब्रह्मणि मुक्तेऽप्यप्रसक्त्या ब्रह्मैवाखण्डं ब्रह्मणो मुक्तस्य च भोग्यम्। स च द्वयोरपि विषय-विषयिणोरसङ्कोचादन्यूनानतिरिक्तः। इति।

खण्डनम् :

तदसारम् । ब्रह्मणो मुक्तानां च ऐन्द्रियकविषयभोगस्य प्रमितत्वात् । तत्र तावद्ब्रह्मणः इन्द्रियाणि 'सहस्रशीर्षा पुरुषः सहस्राक्षः' 'अनेकबाहूदरवक्त्रनेत्रं' इत्यादि श्रुतिस्मृतिसिद्धानि । एवं मुक्तानामपि 'अक्षण्वन्तः कर्णवन्तः' 'श्यामावदाताः शतपत्रलोचनाः' इत्यादिप्रमाणैः सिद्धानि । ब्रह्मण इन्द्रियैर्विषयभोगश्च 'विश्वो हि स्थूलभुक्' 'तद्य इमे वीणायां गायन्ति एतं ते गायन्ति' इत्यादि श्रुतिभिः च प्रमितः । एवं मुक्तस्य विषयभोगश्च 'स्त्रीभिर्वा यानैर्वा जक्षन् क्रीडन् रममाणः' 'सङ्कल्पादेवास्य गन्धमाल्ये समुत्तिष्ठतः' इत्यादिश्रुतिभिः 'मुक्ताः प्राप्य परं विष्णुं तद्भोगान् लेशतः क्वचित् । बहिष्ठान् भुञ्जते' 'विद्योतमानप्रमदोत्तमाभिः' इत्यादिस्मृतिभिश्च सिद्धः । एतेन सर्वोऽपि विषयभोगो हेय इति परास्तम् । ब्रह्मणोऽपि तद्भोगोक्तेः ।

यदुक्तं स च द्वयोरपि विषयिविषययोरसङ्कोचात् अन्यूनानतिरिक्तः इति तत्तुच्छम् । 'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति' 'ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते' इति ब्रह्मण आनन्दादिमहिम्नः अपरिमितत्वस्य, तथा 'लक्षणं परमानन्दो विष्णोरेव न संशयः । अव्यक्तादितृणान्तास्तु विप्लुडानन्दभागिनः' इति इतरेषां रमादीनामानन्दस्य विप्लुण्मात्रत्वस्य च निरवकाशतयोक्तेः ।

यच्चात्र मुक्तानामानन्दसाम्ये विष्णोः परमानन्दत्वलक्षणस्य मुक्तेष्वतिव्याप्तिमाशङ्क्य समाहितम् 'दिव्यात्मस्वरूपगनिरतिशयानन्दत्वस्य स्वरूपलक्षणत्वेऽपि आनन्दं ब्रह्मण इति श्रुतिबोधितधर्मभूतानन्दस्यातथात्वात्' इति तदपि हेयम्। आनन्द एवंविधविभागस्य निर्मूलत्वात्। ब्रह्मणो धर्माणां तस्मात्पृथक्त्वदर्शनस्य 'मृत्योः स मृत्युमाप्नोति' 'य इह नानेव पश्यति' इति श्रुत्या तमःफलकत्वेन विनिन्दनाच्च।

एतेनानन्दसाम्ये 'तुल्यशीलवयोवृत्तादिमतोर्दम्पत्योरिव भवति मुक्तब्रह्मणोरपि भोगः' इति यत् उदाहरणं कथितं तदपि निरस्तम्। अव्यक्ततत्त्वाभिमानिन्या नित्यमुक्ताया रमाया अपि आनन्दस्य ब्रह्मानन्दविप्लुण्मात्रत्वप्रतिपादकप्रमाणपराहतत्वात्। ब्रह्मणो मुक्तानां च तुल्यशीलवयोवृत्ताद्यभावात्। लोके तथाविधयोरपि दम्पत्योरानन्दसाम्यादर्शनाच्च। अतो यत्किञ्चिदेतत्।

विजयीन्द्र....विवेचनम् :

किञ्च आनन्दवल्ल्यां 'श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवगन्धर्वाणामानन्दाः' इति मुक्तानां तरतमभावापन्नमनुष्यगन्धर्वाद्यानन्दसमानानन्दवत्त्वावेदनान्मुक्तौ तारतम्यं दुर्वारम्। अकामहतः श्रोत्रियो, मुक्त इति, त्वयाऽप्यभ्युपगमात्। न च सर्वत्र श्रोत्रिय एको ब्रह्मानन्दतुल्यानन्दः। तत्र मनुष्यगन्धर्वाद्यानन्दसमानानन्दप्रतिपादनं तु एकदेशानुवाद इति वाच्यम्। अपूर्वार्थत्वे संभवति अनुवादत्वाङ्गीकारा-

योगादित्यन्यत्र विस्तरः । तस्मान्मोक्षस्यैकाकारत्वमनुपपन्नम् ॥

परकालयतिः :

आनन्दवल्ल्यां पूर्वपूर्वसंसार्यानन्दात् उत्तरोत्तरसंसार्यानन्दोत्कर्षकीर्तनवत् मुक्तानन्दोत्कर्षकीर्तनाभावात् । परमसाम्यपर्यवसिताभेदबोधकैः मुक्तौ देवादिभेदनिषेधकैः श्रुत्यादिभिः मुक्तावानन्दतारतम्यं बाधितम् । इति ।

खण्डनम् :

तत्तुच्छम् । श्रोत्रियः अवृजिनः अकामहतः इत्यादिशब्दानां मुक्तविषयकत्वेन, निरूप्यमाणतारतम्यस्य मुक्तविषयकत्वावश्यंभावात् ।

न चात्र प्रतिपर्यायोक्तमनुष्यगन्धर्वाद्यानन्दानां मौक्तश्रोत्रियाद्यानन्दस्य एकदेशत्वं अनूद्यते एव न तु मौक्तानन्दो विधीयते इति वाच्यम् । अस्यार्थस्याशाब्दत्वात् । एकदेशत्वानुवादविवक्षायां प्रतिपर्यायं तदुक्तेर्निरर्थकत्वात् । एकवारकथनेनैव पूर्तेः । अपूर्वं मुक्तानन्दतारतम्यमेवात्र विधीयत इत्यस्य समाख्याप्रमाणसिद्धेः । तथा हि— 'अन्येभ्यस्तु विमुक्तेभ्य आनन्दश्चक्रवर्तिनाम् । मुक्तानां हि शतोद्रिक्तः पितृणां तेभ्य एव च । तेभ्योऽप्यृषीणां मुक्तानां कर्मदेवाभिधायिनाम् । तेभ्यश्च मुक्तदेवानां तेभ्यश्चोमापतेस्तथा । तस्माच्च ब्रह्मणस्त्वेवं मुक्तस्य गरुडादपि । एष एव ततो विष्णुः

पूर्णानन्दः प्रकीर्तितः । यस्य ब्रह्मापि मुक्तः सन् विप्लुण्मात्रं समश्नुते' इति । एतेन संसार्यानन्द एवात्रोच्यते स च शीकरस्थानीयः सर्वेषां मुक्तानामानन्दः ब्रह्मानन्दाभिन्नतया सागरस्थानीयः इत्यादि-कुकल्पनामात्रमूला दुरुक्तयो दूरीकृता ज्ञातव्याः ।

यदत्रोक्तं 'परमसाम्यपर्यवसिताभेदबोधकैः मुक्तौ देवादिभेद-निषेधकैः श्रुत्यादिभिः मुक्तावानन्दतारतम्यं बाधितमि'ति तदप्य-सारम्। साम्यस्य भेदव्याप्तत्वेन अभेदः परमसाम्यपर्यवसितः इत्यस्यायोगात् । 'परमं साम्यमुपैति' इति श्रुत्या अभेदस्या-बोधनात् । साम्यस्य पारम्यं च निरञ्जनत्वेनैव । निरञ्जन इति विशे-षणात् । 'सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' इति गीतायां जन्ममरणराहित्येनैव साधर्म्यं न तु सर्वात्मनेति स्पष्टीकरणात् । 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' इति साम्यनिषेधात् । तेन 'परां सिद्धिमितो गता' इत्यत्रापि मुक्तिं गता इत्येवार्थः । न पुनरानन्द-साम्यमिति । भगवत आनन्दस्य 'परो मात्रया' 'यतो वाचो निवर्तन्ते' इत्यादिप्रमाणैः अपरिमितत्वस्य वाङ्मनसागोचरत्वस्य च श्रवणेन 'न ते महित्वमन्वश्नुवन्ति' इति इतराप्राप्यत्वश्रवणेन च मुक्तानां तत्साम्यस्यासंभवदुक्तिकत्वात् । उक्तं च वेदान्तदेशिककृताधि-करणसारावल्यां ब्रह्मण आनन्दस्यापरिमितत्वं वाङ्मनसागोचरत्वं च । तथा हि 'आनन्दानन्त्यमाह श्रुतिरिह हि यतो वाच इत्यादिका' इत्यादि तद्वाक्यम् । तत्र इहेत्यस्य आनन्दवल्ल्यामित्यर्थः । व्याख्यातं च चिन्तामणिटीकायां पदयोजनाटीकायां च तथैव । एवं च यः ब्रह्मणः अनन्तानन्दः वाङ्मनसाधिदेवतया श्रुत्यभिमानिन्या

नित्यमुक्तया रमया अपि वर्णयितुमप्यशक्यः सः कादाचित्कमुक्तैः प्राप्यते इति कथनं कथं न तिरस्करणीयम् ।

किं च 'परमं साम्यमुपैति' इत्यत्राधीतं पारम्यं न सर्वथा किं तु यावत्प्रमाणानुसारेणाबाधितं तावदेवे'ति अधिकरणसारावल्यां 'पारम्यं यच्च साम्ये श्रुतमिह न हि तत्सर्वथेत्यप्यधीतं ग्राव्णो हेम्नश्च यद्वत्समधरणधृतौ स्यात्तदुक्तिस्तथाऽत्र' इति दृष्टान्तोक्त्या स्पष्टीकृतम् । यथा पाषाणसुवर्णयोः परिमाणतः समानयोरपि न वर्णादिना साम्यं तथा मुक्तेश्वरयोरपीति । व्याख्यातं च चिन्तामणिपदयोजनाटीकयोस्तथैव । तथा च स्वस्वयोग्यसर्वकामानामेव मुक्तानां भोगः न तु ब्रह्मतत्कल्याणगुणानां इति पर्यवस्यति । कल्याणगुणाष्टकभोगं वदद्भिरपि रङ्गरामानुजाचार्यैस्तत्राष्टके आनन्दस्य समावेशो न कृतः । किं तु अपहतपाप्मत्वादिकमन्यदेवेत्यवधेयम् । अधिकरणसारावल्यां, ब्रह्मण आनन्दस्य वाङ्मनसागोचरत्वेनापरिमितत्वं कथितम् । पुनः पाषाणसुवर्णदृष्टान्तेन मुक्तब्रह्मणोरानन्दस्य परिमाणतः समानत्वमुक्तम् । तत्तु परस्परव्याहतत्वादुपेक्षणीयमित्यन्यदेतत् । न हि अपरिमितस्य परिमाणसामान्यं संभवि ।

तदेवं ब्रह्मानन्दानुभवसाम्यवादः स्वाचार्यवचनव्याहतोऽपि इत्यतिरोहितम् ।

यदत्रोक्तं मुक्तौ देवादिभेदनिषेधकैः श्रुत्यादिभिः मुक्तावानन्दतारतम्यं बाधितमिति तत्तुच्छम् । आनन्दवल्ल्यां, मुक्तौ इतरत्र च,

मनुष्यगन्धर्वादीनां तदानन्दतारतम्यस्य च मीमांसया समर्थितत्वात् । तन्निषेधकश्रुत्यादीनामभावात् च । त्वदुदाहृतानि तु भेदसाधकान्येव । तथा हि । 'शुनि चैव श्वपाके च पण्डिताः समदर्शिनः' 'निर्दोषं हि समं ब्रह्म' इत्यत्र सर्वत्रावस्थितस्य ब्रह्मणो निर्दोषत्वेन समत्वमेव प्रतिपाद्यते । 'विभेदजनकेऽज्ञाने' इत्यत्र विभेदः मतिभेद एव । 'कथमेकात्मनां भेदः' इति भागवते, मित्रभेदः इति लोके च तत्र प्रयोगदर्शनात् । भेदापलापस्य 'ते मुह्यन्ति शुचार्पिताः' इति निन्दनात् । अन्यथा एवमीदृशानां वाक्यानां स्वरूपभेदनिषेधार्थकत्वाङ्गीकारे छद्मना विनैव तवाद्वैतमतप्रवेशापत्तेः ।

'तदा विद्वान्पुण्यपापे विधूय' इत्यत्र विद्वच्छब्दः ब्रह्मज्ञानिमात्रपरः न तु त्वदुक्तरीत्या ब्रह्मसमानवेदनवान् इत्यर्थकः ॥ 'मां तु न वेद न कश्चन' 'स्वयमेवात्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम' इत्यादिप्रमाणविरोधात् ।

'परमं ब्रह्म वेद ब्रह्मैव भवति' इत्यत्र यथायोग्यं पूर्णः सन् जीवभावेनैवावतिष्ठत इत्येवार्थः । न हि ब्राह्मणपूजकः शूद्रः स एव ब्राह्मणो भवति । 'एवं मुनेर्विजानत आत्मा भवति गौतम' इत्यत्र 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति' इति सदृष्टान्तं शुद्धत्वस्यैव प्राप्त्यभिधानात् । अतः कुत्रापि वाक्ये न भेदनिषेधः ।

यश्चात्र साधने फले मुक्तौ च तारतम्याभिधायिनां विस्पष्टानामपि वाक्यानां अन्यथयितुं दुरुपक्रमः सोऽपि विफलः ।

तथाहि :—

'मनोजवेष्वसमा बभूवुः' इत्यत्र आनन्दातिरिक्ततारतम्यमेव प्रतिपाद्यते इत्यर्थकरणं अशाब्दम्। स्वरूपाविर्भावभाजां अंशेन साम्यं अंशांतरेण वैषम्यमित्यस्यासंभावितत्वात्। अन्यथा स्वरूप एव भेदप्रसक्तेः।

अत्र संसारिभिः एव समत्वाभाव उच्यते न तु मुक्तानां मिथस्तारतम्यमिति तु निर्मूला कल्पना। खद्योतभानू असमावित्यत्र मिथः तारतम्यस्यैव प्रतीतिसिद्धत्वात्। अक्षण्वन्त इत्यादिना मुक्तानामेव पूर्वं प्रकृतत्वात्॥ अन्यथा 'सखायः' इत्यस्यापि संसारिभिः सख्यवन्त इत्येवार्थः स्यात्। न त्वन्योन्यमिति।

'एवमेवायमात्मा इदं शरीरं निहत्यान्यत्कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा......' इत्यादौ कल्याणतरं रूपं पित्र्यादिरूपं मुक्तजीवस्यैव। न च मुक्तौ पितृत्वादिजातिविरहः। तत्सद्भावस्य 'क्षितिपा मनुष्यगन्धर्वाः देवाश्च पितरश्चिराः। आजानजाः कर्मजाश्च देवा इन्द्रः पुरन्दरः। रुद्रः सरस्वती वायुर्मुक्ताः शतगुणोत्तराः' इत्यादि वेदवाक्यैरवगमात्। न च स्वरूपस्य 'कुरुते' इत्युक्तकृतिविषयत्वानुपपत्तिः। आवरणनिवृत्त्या स्वरूपाविर्भावस्य कृतिविषयत्वात्॥

पूर्ववाक्ये उत्क्रान्तिप्रतिपादनेनैव पितृत्वादीनां मुक्तपरत्वसिद्धिः। उत्क्रान्त्या भगवन्तं उपसंक्रान्तस्य बद्धत्वायोगात्। प्रजापत्यादिशब्दानां च रूढ्या बद्धमुक्तोभयतत्तत्परत्वम्। अवस्थाभेदेऽपि व्यक्तेरेकत्वात्।

श्रीसुधायां 'आदघ्नासः उपकक्षा' इत्यादिनाऽभिहितं तारतम्यं इन्द्रियोपभोग्यविषयसाक्षात्काराभिव्यक्तस्वरूपानन्द-निमित्तक एव। यदत्र विकल्पितं, विषयः ब्रह्म वा गन्धमाल्यादिकं वा इति तत्रोभयमपि इति ब्रूमः। न चाद्ये विषयैक्यात् तत्कृतानन्द-तारतम्यस्य दुरुपपादता। विषयस्यैकत्वेऽपि 'नाविशेषादि'त्युक्त-साधनतारतम्यानुगुणस्य साक्षात्कारेऽपि तारतम्यस्योपगमात्। नापि द्वितीये विषयवासनावतां मुक्तत्वव्याघातः। दुर्विषय-वासनायां एव स्यात्तथा। स्वयोग्यानां शुभानां सङ्कल्पमात्रादेव पूर्यमाणानां कामस्य मुक्तत्वोपोद्बलकत्वात्। काममात्रस्याभावे 'अकामहत' इत्यत्र हतशब्दवैयर्थ्यापातात्। अकाम इत्येत्यताव-न्मात्रेण पूर्तेः।

यदप्युक्तं, आनन्दे तारतम्याङ्गीकारे मुक्तानां द्वेषेर्ष्यादिमत्त्वं प्रसज्यते तारतम्यस्य द्वेषेर्ष्याद्यविनाभूतत्वादिति, तदतितुच्छम्। सच्छिष्येषु व्यभिराचात्। दोषवत्त्वस्योपाधेश्च। त्वदादिदुष्टशिष्येषु साध्यव्यापकत्वात्। मुक्तानां विगतदोषत्वेन साधनाव्यापक-त्वाच्च। समेष्वपि लोके द्वेषेर्ष्यादीनां दोषवशात्सुबहुलमुप-लम्भात्। प्रत्युत विषमसाधनवतामपि फलसाम्य एव द्वेषाद्युत्पत्तिनियमात् परानुकूल एव त्वत्तर्काभासः। अन्यथा साधनाननुरूपफलदातुरीश्वरस्य वैषम्यनैर्घृण्यादिदोषप्रसक्तिश्च।

यदपि प्रलपितं, 'नरकेऽपि वसन्नीशो मासौ दुःखभुगीर्यते। नीचोच्चतैव दुःखानां भोग इत्यभिधीयते।' इति त्वदीये भागवत-

तन्त्रे नीचोच्चताया एव दुःखत्वोक्त्या 'निर्दुःखत्वं परानन्दः' इत्युक्तं निर्दुःखत्वमपि मुक्तौ न सिध्येदिति तदपि उन्मादमूलम्। न हि 'नीचोच्चतैव दुःखानां भोग इत्यभिधीयते' इत्यत्र दुःखस्वरूपं विवृतम्। किं तु तद्भोगस्वरूपं एव। नीचोच्चतेत्यस्य च न तारतम्यमर्थः। किं तु दुःखकृतनीचत्वलक्षणविकारः एव। कथमन्यथा नरके नियामकतया वसतः सर्वोत्तमत्वेन तारतम्यान्तगस्य च दुःखलेपाभाव उपपादितः स्यात्। मुक्तानां च निर्दोषत्वात् तारतम्यनिबन्धनो नीचत्वलक्षणो विकारो नास्त्येवेति कथं तेषां निर्दुःखत्वासिद्धिः।

यच्चोक्तं, 'ब्राह्मणक्षत्रियवैश्यादिजीवानामिव श्वसूकरचण्डालादिजीवानामपि तदाकारत्वात् तथा तथा आविर्भूतस्वरूपेषु मुक्तेषु परस्परकुत्सनादिप्रसङ्गः। स्वरूपतः श्वसूकरत्वादिकं श्लाघ्यमित्यत्र नियामकाभावात्' इति। तदप्यसारम्। दोषाभावान्न परस्परकुत्सनादिप्रसङ्गः इत्युक्तत्वात्। नियामकाभावश्चासिद्धः।

'ज्योतिर्मयेषु देहेषु स्वेच्छया विश्वमोक्षिणः। भुञ्जते सुसुखान्येव न दुःखादीन् कदाचन॥' इत्यादीनां ब्रह्मवैवर्तादिप्रमाणानां जागरूकत्वात्। कल्याणतरं रूपं कुरुते इत्यादिश्रुतीनां च। किं च कथमिदमवगतं आयुष्मता वराहसूकराद्याकारमात्रमेव कुत्सितमिति। तथा सति भगवतो मत्स्यकूर्मवराहाद्याकाराणां मौक्तगरुडशेषादिदेवाकाराणां च कुत्सितत्वापत्तेः। भागवते वैकुण्ठवर्णनावसरे 'पारावतान्यभृतसारसचक्रवाकदात्यूहहंस-

शुकतित्तिरिबर्हिणां यः' इत्यादिना नानाजातीयानां पक्षिणां वैकुण्ठे सद्भावस्य वर्णितत्वात् ।

'रसं ह्येवायं लब्ध्वा' इत्यत्र रसं निरतिशयभोग्यत्वं इति त्वदुक्तोऽर्थः त्वत्कुकल्पनामात्रमूलः । रसशब्दो हि सारवाची सन् विष्णुमभिदधाति । 'रसः सारो वरश्चेति शब्दाः पर्यायवाचकाः' इति वचनात् ॥ लब्ध्वेत्यस्य उपसंक्रम्य प्राप्येत्यर्थः । आनन्दीभवतीत्यस्य आविर्भूतस्वरूपानन्दवान् भवतीत्येवार्थः ।

'इन्द्रयेभ्यः परा अर्था' इत्यत्र वशीकार्येषु काष्ठारूपः परमपुरुष इति प्रतिपाद्यते इति यदुक्तं तन्निन्द्यम् । 'उतामृतत्वस्येशानः' इत्यादिप्रमाणसिद्धमुक्ताधिपतेर्वशीकार्यत्वासंभवात् ।

" 'तमेव यूयं भजतात्मवृत्तिभिः मनोवचःकायगुणैः स्वकर्मभिः । अमायिनः कामदुघांघ्रिपङ्कजं यथाऽधिकारावसितार्थसिद्धये' इति भागवते ऐहिकतत्तत्फलकामे एव तारतम्यं प्रतिपाद्यते" इति यदुक्तं तदसारम् । अत्र 'अमायिनः' इति विशेषणेन निष्कामकर्मणां लाभेन तत्फलं मोक्ष एव । स एवात्र अर्थसिद्धये इत्यत्रार्थशब्देन बोध्यते न त्वैहिकफलम् । चतुर्षु पुरुषार्थेषु प्रधानस्य मोक्षस्यैव ग्रहणं अत्र आवश्यकम् । 'तत्रापि मोक्ष एवार्थः आत्यन्तिकतयेष्यते' इति स्मृतेः । 'अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने' इति अभिधानात् । किं चेदं पृथोर्मुनीन् प्रति वाक्यम् । नैवात्र ऐहिकफलककर्मण उपदेशोऽवकाशमासादयति । 'स्वकर्मणा समभ्यर्च्य सिद्धिं विन्दति मानवः' इति गीतायां सिद्धिशब्देन मोक्ष-

स्यैवोक्तेः । व्याख्यातश्चायं श्लोकः मोक्षपरत्वेन बालप्रबोधिन्याम् । तथा वीरराघवकृतटीकायां च इदं पद्यं यथाधिकारं स्वसमीहितं फलं अनतिक्रम्य अर्थसिद्धिः फलसिद्धिः इत्येवं व्याख्यातम् । सर्वप्राणि-समीहितं च मोक्ष एव ।

किं चास्तु वाऽयं श्लोक ऐहिकफलतारतम्यबोधकः । तत्रापि तारतम्यं कुत इति प्रष्टव्यम् । अधिकारसाधनयोस्तारतम्यादिति चेत् हन्त तर्हि तत एव मोक्षेऽपि तारतम्यसिद्धिः ।

अङ्गीकृतश्चायं न्यायस्त्वयाऽपि । तथा हि त्वद्वाक्यं "पूर्वपूर्व-पर्यायोक्तेभ्यः उत्तरोत्तरोक्तानां प्रमाणान्तरसिद्धोत्कर्षवतां तत्साम-र्थ्यातिशयलब्धसाधनतारतम्येन फलतारतम्यस्य न्यायतः एव प्राप्तत्वात्" इति ।

" 'मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशा-न्तात्मा' इति भागवते मुक्तशब्दः ईषणात्रयविनिर्मुक्तयतिपरः न मुक्त-परः" इति यदुक्तं तदपि स्थवीयः । मुख्यार्थत्यागे बाधकाभावात् । न च मुक्तेष्वेव केषांचित् नारायणपरायणत्वानङ्गीकारे तेषां कामो-पभोगपरायणत्वापत्तिर्बाधिकोक्तेति वाच्यम् । सर्वेषां नारायणाय-नत्वोपगमेन तादृशापत्तेरनवकाशात् । तथा च परायण इत्यत्र परशब्देन विशेषणात्तारतम्यसिद्धिर्निष्प्रत्यूहा ॥

यच्च " 'अम्बुवदग्रहणात्तु' इत्यादिसूत्रार्थानुवर्णनमुपक्रम्यो-दितं 'भक्तिविषये गुणादिषु अधिकविषयिताऽस्ति चेदपि प्रीति

तारतम्याभावेन न भक्तितारतम्यस्य, न तत्कृतमुक्तितारतम्यस्य च संभवः' " इति तदपि हेयम् । 'यथा भक्तिविशेषोऽत्र दृश्यते पुरुषोत्तमे । तथा मुक्तिविशेषोऽपि ज्ञानिनां लिङ्गभेदतः ।' इति त्वदनूदितस्मृतिविरोधात् । अन्यथा परमात्मनि वैषम्यदोषप्रसङ्गः ।

यदपि " 'दर्शनाच्च' इति सूत्रभाष्योदाहृते श्रुतिस्मृती न मम संप्रतिपन्ने अतो न मां प्रति तदुदाहरणं युक्तमि"त्युक्तं तदपि अपहसनीयम् । एवं हि अन्धोऽपि ब्रूयात् प्रकाशमनङ्गीकुर्वाणं मां प्रति न तत्साधनाय मदनभिमतचाक्षुषप्रत्यक्षोदाहरणं युज्यते इति ।

तस्मादनादिसिद्धजीवस्वरूपयोग्यतानुगुण्येन मुक्तावप्यानन्दतारतम्यं निष्प्रत्यूहम् ।

परकालयतिः :

जीवस्वरूपे मुक्तौ अपि निर्निबन्धनतयैव योग्यताभेदमङ्गीकृत्यानन्दतारतम्यमङ्गीकृतम् इति ।

खण्डनम् :

तत्तुच्छम् । योग्यताभेदस्य प्रमितत्वेन सर्वैः अङ्गीकर्तव्यत्वात् । तथा हि तत्र प्रमाणानि :—

१) एवमेवायमात्मा इदं शरीरं निहत्याविद्यां गमयित्वाऽन्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां भूतानाम् । (बृ.)

२) देवमानुषगन्धर्वाः पिशाचासुरराक्षसाः ।
सर्वे स्वभावतः सृष्टा न क्रियाभ्यो न कारणात् ॥

(म.भा. अश्व.५२अ)

३) त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्विकी राजसी चैव तामसी चेति तां शृणु ॥

(गी.अ.१७-२)

४) श्रद्धा स्वरूपं जीवस्य तस्माच्छ्रद्धाविभेदतः ।
उत्तमाधममध्यास्तु जीवा ज्ञेयाः पृथक् पृथक् ॥

(गीता)

५) मन्दमध्योत्तमत्वेन त्रिविधा ह्यधिकारिणः ।
तत्र मन्दा मनुष्येषु य उत्तमगणा मताः ।
मध्यमा ऋषिगन्धर्वाः देवास्तत्रोत्तमा मताः ॥

(भाग.तन्त्रे)

६) परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेति ।
अनानुभूतीरवधून्वानः पूर्वीरिन्द्रः शरतस्तर्तरीति ।

(श्रुतिः)

७) द्विविधो भूतसर्गोऽत्र दैव आसुर एव च ।
विष्णुभक्तिपरो दैवो विपरीतस्तथाऽसुरः ।

(विष्णुधर्मे)

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ॥

(गी.अ.१६)

८) य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवेधयत्यजः ।
तत्प्रत्यनीकानसुरान्सुरद्विषो रजस्तमस्कान्प्रमिणोत्युरुश्रवाः ॥

(भाग.स.१)

९) ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥ इत्यादि (गी.)

एवमन्यानि अन्यानि च ।

न चेयं योग्यता न अनादिः इति युक्तम् । आकस्मिकत्वे अतिप्रसङ्गात् । न च पूर्वादृष्टहेतुका । तदेव कुत इत्यनुयोगस्य नान्यदुत्तरम् अनादेर्विशिष्टस्वभावात् । तत्तत्फलप्राप्त्युपाययोः प्रयत्नादृष्टयोरागन्तुकयोर्बीजभूतोऽनागन्तुकस्वभावविशेष एवानादियोग्यतोच्यते । अतः सिद्धा जीवेष्वनादियोग्यता ।

किं च त्वन्मतेऽपि अधिकारे फले च तारतम्यमङ्गीकृतमेवेति न तन्निराकरणं साम्प्रतम् ।

'सत्कर्मनिरताः शुद्धाः सांख्ययोगविदस्तथा । नार्हन्ति शरणस्थस्य कलां कोटितमीमपि' इत्यधिकारतारतम्यमुक्त्वा 'यस्य यावांश्च विश्वासः तस्य सिद्धिश्च तादृशी' इति नारदादिपरमर्षिवचनस्य फलतारतम्ये त्वयैव प्रमाणतयोदाहरणात् (प. २०२) । किं च, 'मुमुक्षवो द्विविधाः कैवल्यपराः मोक्षपराश्चेति' यतीन्द्रदीपिकायां प्रभेदः उक्तः । मोक्षपरेष्वपि भक्ताः प्रपन्नाश्चेति । भक्तावधिकारः त्रैवर्णिकानामेव न शूद्राणां इति । भक्तिनिष्ठा द्विविधाः साधनभक्तिनिष्ठाः साध्यभक्तिनिष्ठाश्चेति ।

प्रपन्नोऽपि द्विविधः । त्रैवर्गिको मोक्षपरश्चेति । मोक्षपरश्च द्विविधः । एकान्ती परमैकान्ती चेति । परमैकान्ती च द्विविधः । दृप्तः

आर्तश्चेति। इत्येवमादिः त्वयोक्तः अधिकारप्रपञ्चः साधनप्रपञ्चश्च न आगन्तुकः। अनवस्थानादित्युक्तत्वात्। तस्मादकामेनाप्यनादिरेवेष्टव्यः। तस्य च स्वभावभूतस्य मुक्तावप्यनुवृत्तिः अपरिहार्या। स्वभावहानौ स्वरूपहानिप्रसङ्गात्। अत आनन्दवल्ल्यामुक्तस्य संसारिषु मुक्तेषु च तारतम्यस्य निराकरणं तव न केवलं प्रमाणविरुद्धं किं तु स्वव्याहतमपि।

परकालयतिः

मुक्तवाचकपदाभावात् युवत्वस्य न नित्यत्वकल्पनसंभवः। अतो युवशब्दो न मुक्तपरः इति।

खण्डनम्:

तत्तुच्छम्। 'सोऽश्नुते सर्वान्कामान्' इति मुक्तमुपक्रम्य 'एष ह्येवानन्दयाति' इति तस्यैवानन्दप्राप्तिं अभिदधत्या श्रुत्या प्रकरणानुगुण्यात् आनन्दवल्ल्यां मुख्यतः मुक्तप्रतिपादनमेव न्याय्यम्। न च मुक्तवाचकपदाभावः। युवादिशब्दानामेव तद्वाचकत्वात्। मुख्यामुख्ययोरिति न्यायेन तेषां नित्ययुवादिपरत्वात्।

यदुक्तं, साधुशब्दस्य विष्ण्वर्थकत्वं मृग्यमिति तदपि मन्दम्। 'सद्भावे साधुभावे च सदित्येव प्रयुज्यते' इति सच्छब्दपर्यायसाधुपदस्य विष्ण्वर्थकत्वस्य प्रसिद्धत्वात्। त्वयैव साधुना विष्णुना सामीप्यवत्त्वात्साधुयुवा ब्रह्मविदिति निर्ब्रुवता तत्पदस्य विष्ण्वर्थकत्वं स्वीकृतं च।

त्वदुक्तेनैव हेतुना साधुयुवशब्दस्य मुक्तार्थकत्वे सिध्यति सति पुनस्तदर्थत्वनिराकरणं व्याहतम् ।

एवं आध्यायक इत्यत्र आङुपसर्गः समीचीनार्थकः । सम्यक्त्वं च मुक्त्याख्याध्ययनफलवत्त्वं इति हेतोः प्रकरणवशाच्च स शब्दो मुक्तपरः स्वरसत एव ।

परकालयतिः :

आशिष्ठ इत्यत्र शमित्यव्ययस्यान्तलोपे मानाभावः । डप्रत्ययेन निर्वाहः विध्यदर्शनादयुक्तः इति ।

खण्डनम् :

तदेतद्व्याकरणाज्ञानविजृम्भितम् । अत्र हि सुखवाची 'श'-शब्दः कोशेषु प्रसिद्धः । 'शं सुखं शरणं वपुः । शः प्रागुक्तः...... ।' इति सौभरिकृतायां अक्षरमालायाम् । तथा 'शं सुखं' इति पुरुषोत्तमकृताक्षरमालायाम् । शं क्लीबे शास्त्रे श्रेयसि मङ्गले इति नानार्थरत्नमालायां च । 'किमपि शं पुष्णाति' इति भर्तृहरिप्रयोगेण च 'श' शब्दः सिद्धः । तस्यैवात्र प्रयोग इति न काऽप्यनुपपत्तिः ॥

एवं लब्धात्म-अकारान्त 'श'रूपनामशब्दान्यथानुपपत्त्या शीङ्धातोः डप्रत्यये 'श'शब्दस्य निष्पत्तिः ।

मकारान्ताव्ययस्यापि अन्त्यस्य मकारस्य लोपः 'चिरपरिचितास्ते ते भावाः' इति लोके 'चिरलोकलोकानां' इत्यत्रैवोपनिषदि दृष्टः इति न तत्राप्यनुपपत्तिः ।

यदत्र युवशब्दस्य आध्यायकशब्दस्याप्रसिद्धार्थकल्पनादोष उक्तः सोऽपास्तो ज्ञेयः । उभयत्र शब्दवृत्तेः प्रसिद्धाया एवोपदर्शितत्वात् ।

प्रत्युत त्वत्पक्ष एव 'साधुयुवाध्यापकः' इत्येकं पदमङ्गीकृत्य युवशब्दस्य प्रत्यग्रत्वार्थं अप्रसिद्धमेव विवक्षित्वा रङ्गरामानुजोक्त एवार्थः अलौकिकः रथकाराधिकरणविरुद्धश्च ।

परकालयतिः :

'स एको मानुष आनन्द' इत्यन्तेन मुक्तामुक्तोभयोद्देश्यकविलक्षणानन्दद्वये प्रतिपाद्ये वाक्यभेदश्च । इति ।

खण्डनम् :

तदसारम् । एक एव चेतनो युवादिशब्दैः प्रतिपाद्यते । तस्य चावस्थाभेदेन विशेषणानि व्यवस्थाप्यन्ते । अतो न वाक्यभेददोषः न वैकविषयताप्रतिभासामुपपत्तिः ।

एतेन, प्रक्रमस्यैवानुपपत्त्या 'ते ये शतमि'त्यादिषु त्वदभिमतोभयानन्दानुवादकतायाः का वार्ता' इत्युक्तमपास्तम् । प्रक्रमपरिशुद्ध्या मानुषानन्दे मुक्तामुक्तोभयविषयकतायाः प्रदर्शितत्वात् ।

परकालयतिः :

एकैकस्मिन् पर्याये मुक्तामुक्तौ द्वौ प्रतिपाद्याविति वाक्यभेदो दोषः । एकधर्मिनिष्ठतया एकवचनानुपपत्तिश्चेति ।

खण्डनम् :

तदपि तुच्छम् । अवृजिनत्वाकामहतत्वादिः मुक्त एव संभवति न तु संसारिणि । अतः एकवाक्यत्वाश्रयणमत्र नोपपद्यते । अतोऽन्यथानुपपत्त्या वाक्यभेदः समाश्रयणीयः । संभवत्येकवाक्यत्वे हि वाक्यभेदो दूषणम् । अत्र च तदसंभवान्न स दोषः ।

ज्ञापकश्चात्र वाक्यभेदस्य 'श्रोत्रियश्च' इत्यत्र चशब्दः । चशब्दो ह्ययं समुच्चयस्य द्योतकः प्रतीयते । देवदत्तो धनिको यज्ञदत्तश्चेति यथा । न चैकविषयतायामेवं युज्यते ॥ न हि भवति 'वसिष्ठो ब्रह्मिष्ठोऽरुन्धतीपतिश्च तथे'ति प्रयोगः ।

एकवचनं चात्रैवोत्तरत्र पर्यायेषु इन्द्रबृहस्पतिब्रह्मशब्दानामेकवचनान्तत्वेन तदन्वयोपपत्त्यर्थं साधारण्येन वा 'तत्र भवः' इति सूत्रे वन्या इति अपि रूपसिद्ध्यर्थमविवक्षितत्वाद्वा मुक्तानामेवायं नियमेन शतगुणोद्रेक अन्यदा तु कदाचिद्भवति कदाचिद्व्याकुलतया न भवतीति निदर्शयितुं वेति विभावनीयम् ।

प्रत्युत तवैव सर्वत्र पर्यायेषु मुक्तानामानन्दे संसार्यानन्दस्यान्तर्भावं वदत एकवचनेन मुक्तानां निर्देशोऽनुपपन्नः ।

किं च त्वत्पक्षे 'स एष ब्रह्मण आनन्द' इत्यत्र ब्रह्मशब्देन परमात्मैव विवक्षितः। तथा च अन्तर्भावपक्षे तस्याप्यानन्दस्य मुक्तानामानन्दे अन्तर्भावो वक्तव्यः। एवं च तदानन्दस्यापरिमितत्व-हानिप्रसङ्गः। ब्रह्मण आनन्दस्योपजीव्यत्वं मुक्तानामानन्दस्य तदुप-जीवकत्वमिति त्वदभ्युपगमविरोधश्च।

किं च वेदान्तदेशिककृतगीताभाष्यतात्पर्यचन्द्रिकायां सालोक्यसारूप्यसामीप्यादिवर्णनेन मोक्षे तारतम्यं वर्णितम्। एवं 'एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्' इति श्लोकव्याख्यानावसरे यादवप्रकाशैरपि, योगसिद्धौ तारतम्यं, फले मोक्षे च तदानुरूप्यं उक्तम्।

न च वाच्यं उभयेषां मते सायुज्यमेव मोक्षः मोक्षशब्दः सालो-क्यादिषु तु उपचारेणैवेति। 'मोक्षं सालोक्यसारूप्यं प्रार्थये न कदाचन। इच्छाम्यहं महाभागकारुण्यं तव सुव्रत' इति पञ्चरात्रागमे सालोक्यादीनामपि मोक्षत्वस्मरणात् तत्र उपचारकल्पनस्या-योगात्। 'मोक्षं नेच्छामी'ति वर्णितं तु एकान्तभक्तविवक्षया।

'एवं गजेन्द्रो भगवत्स्पर्शाद्विमुक्तोऽज्ञानबन्धनात्। प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः।' इति भागवते सारूप्यस्यापि सुस्पष्टं मोक्षत्वाभिधानात्।

एतेन युवादिशब्दार्थानां अप्रसिद्धार्थवर्णनं इति यदुक्तं तन्निरस्तम्। समाख्यावाक्यैः प्रकरणानुगुण्येन च विद्वत्प्रसिद्धेरुप-

दर्शितत्वात् । शास्त्रार्थोक्तौ शास्त्रीयप्रसिद्धेरेव सर्वमीमांसकैरादरणीयत्वात् ।

प्रत्युत रामानुजाचार्यैः एव गीताभाष्ये 'वेदान्तकृत्' इत्यत्र अन्तशब्दस्य फलमिति 'पदमयं' इत्यस्य अनवच्छिन्नज्ञानाकारं इति । एवं तत्र तत्राप्रसिद्धार्थवर्णनानि कृतानि दरीदृश्यन्ते । आपातप्रतीत एव सर्वत्र शब्दार्थ इत्यङ्गीकारे निगमनिरुक्तव्याकरणानि वेदाङ्गानि मोघानि स्युः । मीमांसोन्मूलिता स्यात् । साम्प्रदायिकगुरूपदेशश्च विफल एव स्यात् ।

एतेन युवा स्यादित्यादेः प्रसिद्धार्थत्यागे रथकाराधिकरणविरोधोऽपि भवेदित्युक्तं परास्तम् । प्रसिद्धार्थत्यागस्त्वत्पक्षे एव न मत्पक्षे इत्युक्तत्वात् । यदुक्तम् 'स एक' इति प्रत्यक्षैकश्रुतिबाधेन आनन्दद्वित्वकल्पनं न युक्तम् । श्रुतिलिङ्गाधिकरणविरोधात्' इति तदप्यसङ्गतम् । न ह्यत्र लिङ्गविरोधेन एकश्रुतेः द्वित्वार्थत्वमुक्तम् । किं तु संसारिमुक्तपरतया योजनाभेद एव कथितः । उभयत्रैकशब्दस्य एकत्वमेवार्थ उक्तः । किञ्च अनेकार्थत्वं तु शास्त्राणां भूषणमेव । तदुक्तमभियुक्तैः 'त्र्यर्थतां श्रुतिषु वित्त दशार्थम् । भारतं ननु शतार्थमपि स्याद्वैष्णवं पदसहस्रतयं हि' इति । एवंभूते त्वया विरम्यव्यापार इत्युक्तदोषः अपहसनीयः । चक्षुषा घटद्वयस्येव युगपदेकेन शब्देन अर्थद्वयबोधनस्योपपत्तेः । मुख्यवृत्तावेव योगरूढ्योरिव तारतम्यं च युक्तम् । 'अद्यतेऽत्ति च भूतानि तस्मादन्नं' इति श्रुत्यैवान्नशब्दस्यानेकार्थत्वं प्रदर्शितमत्रानुसन्धेयम् । एवं

'यच्चाप्नोति यदादत्ते' इत्यादिस्मृत्याऽपि आत्मशब्दस्य बह्वर्थत्वं वर्णितम्।

यदुक्तम्, श्रोत्रियपदस्यासर्वनामत्वेन पूर्वपदोपस्थापित-विशेषपर्यवसानमित्यप्ययुक्तमिति, तदप्यसारम्। अत्ताधिकरण-न्यायेन सामान्यशब्दस्य सन्निहितविशेषपरत्वस्यैव वक्तव्यत्वात्। अत एव 'ब्रह्मविदाप्नोति परम्' इत्यत्र ब्रह्मशब्दस्य परब्रह्मार्थकत्व-मेवाश्रितम्। एतेन श्रोत्रियशब्दः न सामान्यशब्दः इत्युक्तिरपि परास्ता। ब्रह्मशब्देऽपि तथात्वापत्तेः।

एतेन प्रयाजानुयाजोदाहरणमपि समाहितम्। यच्चात्रोक्तम् "नात्र आनन्दतारतम्यस्य अनुवादो, वैयर्थ्यात्। न विधानं, 'परमं साम्यमुपैति' इत्युपक्रमविरोधादिति तदपि तुच्छम्। पक्षद्वयस्यापि निर्दोषत्वात्। अनुवादस्य दार्ढ्यहेतुत्वात्। अन्यथा 'तत्त्वमसि' इत्यस्य नवकृत्वः अभ्यासोऽपि व्यर्थः स्यात्। 'परमं साम्यं' इति उपक्रमस्य, निरवकाशप्रमाणानां 'जगद्व्यापारवर्जं' 'न ते महित्व-मन्वश्नुवन्ति' इत्यादीनां चानुगुण्याय सङ्कोचेनैव व्याख्यानस्य सम-र्थितत्वेन नोपक्रमविरोधोऽपि।

'सोऽश्नुते सर्वान्कामान् सह ब्रह्मणा' इत्यत्र भोक्तृसाहित्यमे-वोच्यते न भोग्यसाहित्यमिति समर्थितम्। पुत्रेण सह ओदनं भुंक्ते इत्यत्र भोक्तृसाहित्यमेव प्रतीयते न भोगसाहित्यम्। न च तथा सति 'सहयुक्तेऽप्रधाने' इति सूत्रेण ब्रह्मणोऽप्राधान्यं स्यादिति शङ्क्यम्। भोगसाहित्यपक्षेऽपि तद्दोषप्रसरात्। एतत्सूत्रोक्त-

मप्राधान्यं पारिभाषिकमिति शेखरादिग्रन्थेषु व्याख्यातत्वान्न स दोष इति चेत्समं भोक्तृसाहित्यपक्षेऽपि । उभयसाहित्योक्तौ वाक्य-भेदः स्फुटः । 'पूर्णो देवो जीवसङ्घस्त्वपूर्णः' इत्यपूर्णत्वेन श्रुति-सिद्धस्य जीवस्य न त्वदुक्तं व्यापकावधि ब्रह्मदर्शित्वं, न वा व्यापकावधिब्रह्मकल्याणगुणानुभवः संभवति ।

यदुक्तं प्रतिपर्यायं श्रोत्रियमनुष्यगन्धर्वाणामित्यादिनिर्देशः स्यात् इति तन्न । सन्निधानादेव मनुष्यगन्धर्वादिविशेषलाभेन विशिष्य निर्देशानपेक्षणात् । अत एव मनुष्यगन्धर्वादिपदानां श्रोत्रियांशे अध्याहारो लक्षणा वा दोष इत्यपि निरस्तम् । अत्ता-धिकरणन्यायेन सन्निधानादेव तदर्थलाभेन अध्याहाराद्यभावात् ॥

ते ये शतं मुक्तमानुषाणामानन्दा इत्यादिनिर्देशापादनं त्वयुक्तम् । अत्र हि प्रकरणपरिशुद्ध्या संसार्यानन्दतारतम्यं दृष्टान्तीकृत्य मुक्तानन्दतारतम्यं प्रतिपर्यायं अतिदिश्यते । तेन दृष्टान्तपरपूर्वभागेषु मुक्तेतिविशेषणमनपेक्षितमेव । श्रोत्रियादि-शब्दानां सर्वत्र मुक्तरूपैकार्थत्वेन अर्थवैरूप्यं तु नास्त्येव । तत्त-न्मुक्तपरत्वं तु सन्निधानबलादेवेत्युक्तम् । मुक्तामुक्तोभयानन्दस्य पूर्वं प्रस्तुतत्वेऽपि 'ते ये शतं' इति यत्तच्छब्दाभ्यां उत्तरत्र संसार्या-नन्दमात्रस्य परामर्शो दृष्टान्ताभिधानोद्देशेनेति युक्त एव ।

'श्रोत्रियश्च' इत्यादौ एकवचनं तु प्रागेव समाहितम् । इन्द्र-बृहस्पत्यादीनामेकत्वेन तत्राप्यैकरूप्येणान्वयोपपत्तिलाभार्थं च ।

यदत्र विकल्पितं एकशब्दः एकदेशवाची वा एकत्वसंख्यावाची वेति तदसङ्गतम् । एकदेशवाचित्वेऽभिधानाद्यभावेन विकल्पाप्रसरात् । एकत्वसंख्यावाचित्वे मुक्त्यभिलाषाद्यनुदय इति तु कथनं बालिशम् । दुःखहेत्वावरणाभिभवार्थं स्वस्वयोग्यस्वरूपसुखाविर्भावार्थं च अभिलाषाद्युपपत्तेः ॥

एतेन मनुष्याणां मनुष्यगन्धर्वानन्दप्राप्तिः फलमिति स्वयं परिकल्प्य तत्पक्षे या दूषणोक्तिः सा 'अबद्धं पठित्वा कुचोद्यं करोति' इत्याभाणकविषयमात्मानं तनोति ।

यत्तूक्तं प्रथमपर्याये 'श्रोत्रियस्य चाकामहतस्ये'ति वाक्यकल्पनाक्लेश इति तदपि तस्य मुक्तामुक्तोभयपरतायाः प्रागेव समर्थनात्परास्तम् ।

एवं ब्रह्मपर्याये श्रोत्रियान्तरकल्पनाक्लेश इति यदुक्तं तदपि न । वाजसनेयके 'यश्च श्रोत्रियो वृजिनोऽकामहत' इति श्रवणात् । अन्यत्रापि तदनुसन्धानोपपत्तेः ।

यच्चोक्तं प्रजापतिशब्दस्य दक्षादिपरत्वं अप्रसिद्धमिति तन्न । प्रजापतिशब्दस्य दक्षादिष्वपि प्रसिद्धिसद्भावात् । यथोक्तं भागवते 'यदाऽभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना । प्रजापतीनां सर्वेषां आधिपत्ये स्मयोऽभवत् ।' इत्यादि । प्रकरणाद्यनुरोधेनात्र तदर्थग्रहणस्य श्लिष्टत्वात् । रामानुजाचार्यैरपि 'यो ब्रह्माणं विदधाति पूर्वं' इत्यत्र ब्रह्मशब्दस्य परब्रह्मार्थकत्वत्यागेन हिरण्यगर्भार्थकत्वं

व्याख्यातम्। एवं 'मम योनिर्महद्ब्रह्म' इत्यत्र ब्रह्मशब्दः अचेतन-प्रकृतिपर इत्युक्तम्। अतो बाधकसद्भावे शब्दानाममुख्यार्थ-परिग्रहोऽपि समुचित एव। सर्वसंप्रतिपत्तेः।

यच्च 'विकल्पो विशिष्टफलत्वादि'ति सूत्रस्य अविशिष्टेति पदच्छेदमाश्रित्यापार्थवर्णनं तदपि भाष्योदाहृतेन,

नृसिंहादिकमन्यच्च दुरितादिनिवृत्तये।
उपास्यते यथायोगं न वा फलविभेदतः॥

इति ब्रह्मतर्कवचनेनैव दूषितम्॥ व्यवस्थितविकल्पनस्य निर्निबन्धनत्वोक्तिरत एव पराकृता।

विघ्ननिरासरूपफलस्यैकत्वेन विकल्पोपपत्तेर्न जैमिनिसूत्र-विरोधः। हृद्यपेक्षयेति सूत्रं तु न त्वदुक्तरीत्या मनुष्याणां न सर्वोपा-सनाऽधिकारमाह किं तु पश्वादीनामनधिकारमात्रम्। अन्यथा शूद्राणामुपासनाऽधिकाराभावप्रतिपादकत्वत्सिद्धान्तविरोधः।

'न तत्सम' इति श्रुतिः तु सुस्पष्टम् भगवतः लोकत्रयेऽ-प्यप्रतिमप्रभावत्वं प्रतिपादयन्ती त्वद्दुरभिलषितं भोगसाम्यं प्रतिषेधत्येव॥ त्वयाऽपि धर्मभूतनित्यानन्द एव साम्यं न स्वरूपानन्दे इत्यभ्युपगमेन समशब्दस्य सङ्कुचितार्थकत्वं समा-श्रितमेव।

परकालयतिः :

भोगसाम्यमेव 'भोगमात्रसाम्यलिङ्गाच्च' इति सूत्रितम्। 'स्थितिमाह दर्शयतश्चैवं प्रत्यक्षानुमाने' इति पूर्वसूत्रं नानन्दादीनां वृद्धिह्रासनिषेधार्थकम्। मुक्तस्य ब्रह्मव्यतिरिक्तविषयानुभवाभावात्। ब्रह्मानुभवे निरतिशयविपुलसुखात्मके वृद्धिह्रासाप्रसक्तेः। उपासनं तु मुक्तानां नास्त्येव। तारतम्यदर्शनादिव वृद्धिह्रासाभ्यामपि दुःखाद्यप्रसक्त्या तन्निषेधस्य च अप्रसक्तिरेवेति।

खण्डनम् :

तत्तुच्छम्। 'न ते महित्वमन्वश्नुवन्ति' इत्यादिमानैर्भोगसाम्यस्य श्रुतिनिषिद्धत्वेन तस्य न सूत्रार्थत्वम्। पूर्वसूत्रस्य वृद्धिह्रासभाक्त्वनिषेधपरत्वं भाष्योदाहृतजाबालश्रुतिब्रह्मवैवर्तमोक्षधर्मवचनैः सिद्धम्। ब्रह्मव्यतिरिक्तविषयानुभवः 'गन्धमाल्ये समुत्तिष्ठतः' इत्यादिश्रुतिभिः 'मुक्ताः प्राप्य परं विष्णुं तद्भोगाँल्लेशतः क्वचित्। बहिष्ठान्भुञ्जते नित्यं नानन्दादीन् कथञ्चन' इत्यादिस्मृतिभिश्च प्रागेव निपुणतरं समर्थितम्। ब्रह्मानुभवस्तु नास्त्येवेति च।

'हरेरुपासना चात्र सदैव सुखरूपिणी।
न तु साधनभूता सा सिद्धिरेवात्र सा यतः॥'

इति स्मृत्या मुक्तावपि उपासनासद्भावः तस्याः सिद्धिरूपता च सिद्धा ।

लोके सच्छिष्याणामपि स्वोत्तमगुरुदर्शनेन न दुःखादिकं किमुत निरस्तसमस्तदोषाणां मुक्तानां इति स्वोत्तमानन्दाधिक्य-दर्शनाद्दुःखाभावः, स्वस्मिन्नेव आनन्दवृद्धिह्रासौ तु विकारहेतू इति अनुभवसिद्धौ इति तन्निरासो युक्त एव ।

न च भाष्योदाहृतकूर्मवचनेन कादाचित्कविशेषाभिधायिना विरोधः । 'प्रवाहतस्तु वृद्धिर्वा ह्रासो वा नैव कुत्रचित्' इति तत्रैवोदाहृतनारायणतन्त्रवचनेन तत्परिहारात् । वृद्धिह्रासाभावोक्तिः अपरोक्षज्ञानव्यङ्ग्यस्य प्रचुरतरानन्दस्यैव । ज्ञानोत्तरभाविसत्कर्म-व्यङ्ग्यानन्दवैचित्र्यं तु अङ्गीकार्यमित्याशयः । अलंबुद्धिगोचरा-नन्दस्य सदा विद्यमानत्वेन एवंविधो विशेषो न संसारसमानधर्मताऽऽपादकः इति न तन्निरासः ।

यदत्रोक्तम् " 'भोगमात्रसाम्यलिङ्गादि'त्यनेनैव स्वाधिकारा-धिकभोगनिषेधेन जगद्व्यापारवर्जमिति सूत्रं तव व्यर्थमि"ति तन्न । भोगमात्रेति सूत्रं वृद्धिह्रासाभावं समर्थयति । जगद्व्यापारेति सूत्रं तु 'सर्वान्कामानाप्त्वा' इति श्रुतिप्राप्तसत्यकामत्वस्य सङ्कोचेनार्थ-समर्थनपरं सत् जन्मादिहेतुत्वलक्षणस्य मुक्तेऽतिव्याप्तिं निवारय-तीति न वैयर्थ्यशङ्कालेशोऽपि ।

प्रत्युत जगद्व्यापारनिमित्तकानन्दाभावं मुक्तस्य समर्थ्य तेन आनन्दसाम्यवादभञ्जकं तत्सूत्रं तवैव प्रतिकूलम्।

या तु, मुक्तस्य निरतिशयानन्दत्वे आनन्दमयशब्दस्य मुक्ते समन्वयापत्तिरित्याशङ्क्य निरतिशयत्वसाम्येऽपि ब्रह्मण आनन्दस्य निरुपाधिकत्वेन न तद्दोष इति तत्परिहारोक्तिः साऽपि तुच्छा। मुक्तानन्दस्य विप्लुण्मात्रत्वाभिधायकप्रमाणविरोधेन निरतिशयत्वस्यैवाभावेन उक्तशङ्कापरिहारयोरकाण्डताण्डवायितत्वात्॥

यच्चोक्तं, समग्राया आनन्दवल्ल्या ब्रह्मानन्दमात्रपरत्वे एकवाक्यता। अन्यत्सर्वमर्थवादः। मुक्तामुक्तानन्दविधायकविधिप्रत्ययादर्शनादिति, तद्बालिशम्। तथा सति सर्वस्य प्रकरणस्य बद्धानन्दरूपस्यैकस्यैवार्थस्य प्रतिपादकत्वमस्तु। सुतरामेकवाक्यतासंभवात्। मुक्तानन्दे अन्तर्भाववाचकपदानां प्रकरणे क्वाप्यश्रवणाच्च। तत्प्रतिपादने प्रतिपर्यायं वाक्यभेदापादात्।

बद्धानन्दपरत्वे 'यतो वाचो निवर्तन्ते' इत्युक्तनिरतिशयत्वानुपपत्तिरिति चेत्तन्मुक्तानन्देऽपि समम्। 'मात्रामुपजीवन्ती'ति तस्य सातिशयत्वोक्तेः। 'यतो वाचः' इति श्रुतेर्ब्रह्मपरत्वेन निरतिशयत्वानुपपत्तेरभावात्।

विधिप्रत्ययाभावान्नानन्दतारतम्यविधिरिति चेत् तर्हि तत एव मुक्तानन्दनिरतिशयत्वादीनां अपि असिद्धिः। 'विज्ञानमानन्दं ब्रह्म'

इत्यादिष्वपि तत्प्रत्ययाभावात् ब्रह्मण आनन्दाद्यसिद्धिश्चेति यत्किञ्चिदेतत्।

स्वकुकल्पितार्थे मीमांसासंमत्युदाहरणदुरुपक्रमोऽबद्धं पठित्वेति न्यायमनुकरोति॥ प्रमाणबाधिते आनन्दसाम्ये न्याया-नवतारादेव।

यच्चोक्तं साधनतारतम्येन फलतारतम्यस्य न्यायत एव सिद्धत्वान्न तत्र विधेस्तात्पर्यमिति तत्तुच्छम्। न्यायसिद्धस्य त्वयाऽपलापायोगात्। त्वत्कुमतनिरासकत्वेन विधेः सार्थक्यम्। प्रमाणसंप्लवस्य दार्ढ्यार्थत्वात्। अन्यथा जगच्चेष्टकत्वादिना सिद्धे आनन्दमयत्वेऽपि श्रुतीनामतात्पर्यापातात्।

किं च ब्रह्मानन्दप्रशंसामात्रपरत्वे 'यतो वाचो निवर्तन्ते' इत्ये-तावता पूर्तेः सर्वमन्यद्व्यर्थम्। न च तदर्थत्वेनैव संसार्यानन्दस्य शीकरस्थानीयत्वोक्तिरित्युक्तमिति वाच्यम्। दुरुक्तमेव तत्। न खलु सागरस्य महत्ताप्रशंसार्थं तस्य बिन्दुमात्राधिक्योक्ति-रुपपद्यते।

अत आनन्दतारतम्यं विधीयत इत्येव युक्ततरम्। यदपि आनन्दमयाधिकरणे वस्त्वपरिच्छेदात्मकमुपादानत्वमुच्यते इत्यादि प्रलपनं तद्ब्रह्मण उपादानत्वनिराकरणादेवापहस्तितम्।

यच्च सायुज्यसार्ष्टिशब्दयोरन्यूनाधिकभोगपरत्वार्थोपवर्णनं तन्निर्मूलम् 'बहिष्ठान्भुञ्जते भोगान्नानन्दादीन् कदाचन' इत्यादि-

प्रमाणविरुद्धं च । यथा राजादिषु मन्त्र्यादयः सामान्यभोगान् गीतलास्यादीन् एवाश्नुवते न त्वसाधारणान्तःपुरादिभोगान् तथेतिलोकरीतिपराहतं च ॥

यदपि भाष्योदाहृतप्रमाणानामप्रसिद्धत्ववर्णनं निरवकाशानामपि तेषामन्यथार्थवर्णनसाहसं तदति तुच्छम् । अत्र प्रष्टव्यम् । कस्य अप्रसिद्धिः । सर्वेषामुत तवैव । नाद्यः । प्राग्भिर्विद्यारण्यादिभिः सुप्रसिद्धवेदव्याख्यातृभिरपि कैरपि तेषामप्रसिद्ध्यनुक्तेः । अथ ब्रूयाः ममैवाप्रसिद्धेरिति मोच्चैर्वोचः । दिवाकरप्रकाशापलापदुर्व्यसनी दिवान्धोऽपि श्रोष्यति । सूर्यप्रकाशप्रसिद्धिमपलप्य सोऽपि आतपमन्धकारात्मना व्याख्यास्यति ।

याऽपि उपक्रमे माध्वानां नित्यसंसारित्वं इति प्रतिज्ञाय उपसंहारे 'अपारं घोरं तमस्समुपयन्ती'ति तमोयोग्यत्वोक्तिः साऽपि अपसिद्धान्तमप्यविगणय्य स्वव्याहतोक्तिपरस्य प्रमाणप्रद्वेषिणस्तवैव महातमोयोग्यतां सुदृढतया संस्थापयतीत्यलं प्रमृतमारणेन ॥

मुक्ततारतम्ये सुधाद्युक्तानुमानसमर्थनम्

'देवादयो मानुषादिभ्योऽधिकमौक्तफलभाजः तदपेक्षयाऽधिकतत्साधनवत्त्वात् ।' इत्येवमाद्यनुमानानां ये दोषा उक्तास्ते सर्वे पूर्वोक्तप्रमाणैरेव निःशेषनिरस्ताः । तथा हि :— अपवर्गे अखण्डब्रह्मानुभव एव सुखं न तदतिरिक्तो भोगोऽस्ति इति यदुक्तं

तत् 'लेशतः क्वचित्। बहिष्ठान्भुञ्जते नित्यं नानन्दादीन्कथञ्चन' 'सङ्कल्पादेवास्य गन्धमाल्ये समुत्तिष्ठतः' इत्यादिप्रमाणैरपाकृतम्। ब्रह्मव्यतिरिक्ततया मुक्तस्य सुखगन्धाभाव इति तु बहिष्ठा-नित्युक्त्या प्रत्याख्यातम्। परमात्मनः स्थूलभोगाप्रसक्तिरिति प्रलापः 'शुभं पिबत्यसौ नित्यं' 'अश्नामि प्रयतात्मनः' इत्यादि-प्रमाणैर्निरस्तः। भक्त्यादिसाधने तरतमभावाभाववचनं स्वव्याहृ-तम्। 'प्रपत्तिरेव भक्तेर्गुरुभूततरा' (प. २०२) इति स्वयमेव साधने तारतम्याभिधानात्। अभिहितं असंबद्धं त्वित्यन्यदेतत्।

साधनतारतम्यं च 'दशकल्पं तपश्चीर्णं रुद्रेण', 'ध्यानेनात्मनि पश्यन्ति केचित्', 'सति हि गुणे प्रवदन्त्यतुल्यताम्', 'ब्रह्मादीनां तु मुक्तानां तारतम्ये तु कारणम्। तारतम्यस्थितानादिनित्या भक्तिर्न चेतरत्', 'ब्रह्मणः परमा भक्तिः सर्वेभ्यः परमस्ततः' इत्यादिपरःसहस्रैः प्रमाणैः प्रमितम्। यावद्ब्रह्मगुणानां त्वन्मते ब्रह्माभिन्नतया कथं कृत्स्नैकदेशविषयत्वकृतमुपासनतारतम्यम् इत्याक्षेपः तुच्छः। मन्मते सकलप्रमाणप्रमितविशेषाङ्गीकारेणोक्ततारतम्यं श्लिष्ट-तरम्। विशदीकरिष्यते चैतदग्रे विशेषसमर्थनेन ।

यच्चोक्तम् 'यज्ञदानादिविधुरसन्न्यस्तत्वद्गुरुपङ्क्तिषु साधन-तारतम्यस्य त्वयाऽपि दुरुपपादत्वात् इति तन्महोन्मत्तप्रलपितम्। तेषामपि ज्ञानयज्ञे विद्याऽऽदिदानादौ चाधिकारसद्भावात्। मद्गुरूणां देवांशत्वेन प्रमितानां 'कृत्स्ना ह्येते गृहिणो देवाः कृत्स्ना

ह्येते यतयः' इत्यादिश्रुत्या मूलरूपेषु सर्वाश्रमधर्मेष्वधिकारवत्त्वेन त्वत्कुचोद्यानवकाशात् ।

यदप्युक्तम् 'बह्वल्पायाससाध्यसुखत्वेन न तारतम्यसिद्धिः तत्तच्छक्त्यनुगुणायासेषु सर्वेष्वपि बहुत्वपौष्कल्यात् स्वस्वशक्त्यनुगुणमल्पत्वमप्यविशिष्टमि'ति तदपि दुरुक्तम् । मोक्षसाधनत्वाविशेषेऽपि भक्तिप्रपत्त्योः आयासे बहुत्वाल्पत्वयोस्त्वयैवाङ्गीकारात् । तथाहि त्वद्गुरुवरवचनम् 'विश्वासायासभूम्नोर्व्यसनभजनयोरि'त्यादि ।(प.२०३) । किं च अलौकिकमिदं भाषणं यत्स्वस्वशक्त्यायासेन समानं फलमिति । न खलु स्वशक्त्योत्पतन्ती मक्षिका विष्णुपदे गरुत्मता समानं स्थानमश्नुते । अशास्त्रीयं च । न हि स्वशक्त्या पतन् क्षुद्रमर्कटो मारुतिरिव शतयोजनसमुद्रोल्लङ्घनस्येष्टे ।

आनन्दतारतम्यानुमानसमर्थनम्

यच्च तारतम्यसाधकयुक्तीनां 'परमं साम्यमुपैति' इति श्रुत्या बाधवचनं तदपि भ्रान्तिविलसितम् । अत्रोक्तसाम्यस्य 'मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' इति स्मृत्यैव व्याख्यातत्वेनात्रोक्तपरमत्वस्य तदनुसारेण सङ्कोचनीयत्वात् । न च सङ्कोचो न युक्त इति वाच्यम् ।

त्वयाऽपि हि जगद्व्यापारादिभिन्नत्वेन साम्यमिति सङ्कोच आश्रितः । तत्कुत इति वक्तव्यम् ॥ श्रुत्यन्तरविरोधादिति

चेत्समम् ॥ आनन्दसाम्यस्य 'मनोजवेष्वसमा बभूवुः' इत्यादि-निरवकाशपरःसहस्रश्रुतिस्मृतिविरुद्धत्वात् ।

ब्रह्मवन्निरतिशयानन्दवत्त्वं, न मुक्तगामि, ब्रह्मलक्षणत्वात्, जगत्कारणत्ववत्, इत्यनुमानदूषणमुपक्रम्य यदुक्तं निरतिशयानन्दः न ब्रह्मलक्षणपर्याप्त्यधिकरणं किं तु स्वगतयावद्गुणतः परिच्छित्ति-रहितत्वं इत्यादि तदपि हेयम् । 'नेह नानास्ति किञ्चने'त्यादिश्रुतिभिः ब्रह्मणि स्वगतभेदनिषेधेनानन्दादिप्रत्येकगुणोऽपि लक्षणपर्याप्त्य-धिकरणमेव । 'विज्ञानमानन्दं ब्रह्म' 'कं ब्रह्म खं ब्रह्म' इत्यादौ सामानाधिकरण्येन 'स्वाभाविकी ज्ञानबलक्रिया च' इति स्वाभा-विकत्ववचनेन ज्ञानादीनां तत्स्वरूपत्वावगमात् ॥ 'लक्षणं परमा-नन्दो विष्णोरेव न संशयः । अव्यक्तादितृणान्तास्तु विप्लुडानन्दभागिनः' इति इतरेषां निषेधपूर्वकं परमानन्दस्य विष्णु-लक्षणत्वेनावधारणात् । 'को ह्येवान्यादि'ति श्रुत्या जगच्चेष्टकत्व-लिङ्गेन तस्यैव परमानन्दरूपताया उपपादनाच्च । न हि त्वत्पक्षेऽपि मुक्तस्य जगच्चेष्टकत्वमस्ति ॥

यदपि 'मुक्तानन्दः परमसाम्यरहितः' इति प्रतिज्ञायां अप्रसिद्ध-विशेषणत्वमुक्तं तदपि तुच्छम् । त्वत्कुसमयप्राप्तस्य निषेधोप-पत्तेः । न हि निषेधाय प्रमितिरावश्यकी किं तु प्रसक्तिमात्रम् । अन्यथा कथा बधिरकलहः स्यात् ।

यदपि सजातीयान्तरसत्त्वे एव साम्यशब्दप्रयोग इति तदपि मन्दम् । 'निर्दोषं हि समं ब्रह्म' 'पण्डिताः समदर्शिनः' इत्यादौ विष्णोः

स्वस्मिन्नेव स्वसमत्वव्यवहारदर्शनात् । एवं भागवतेऽपि कृष्णेन पितरौ प्रति 'अदृष्ट्वान्यतमं लोके शीलौदार्यगुणैः समम् । अहं सुतो वामभवमि'ति स्वस्यैव स्वसमत्वोक्तेश्च ।

यच्चापि ब्रह्मस्वरूपगुणादिकं न मुक्तभोग्यमतदीयत्वात् इत्यनुमाने तदीयत्वं विकल्प्य तच्छेषत्वं चेद् व्यभिचारः तत्संबन्धित्वं चेत्स्वरूपासिद्धिरित्युक्तं तदपि दुरुक्तम् । तत्संबन्धित्वं नाम तद्वृत्तित्वम् । तच्च मोक्षे स्वरूपतयैव स्वीयतया अनुसन्धीयमानत्वं इति न कश्चित्क्षुद्रोपद्रवः । ईश्वरानन्दो मुक्तानन्दादुत्कृष्टः शेष्यानन्दत्वात् इत्यत्र अपि न त्वदुक्तकुचोद्यावकाशः । अत्र उत्कर्षः स्वरूपत आधिक्यम् । तच्च 'यतो वाचो निवर्तन्ते' इति श्रुतिसिद्धम् । हेतुश्च 'मात्रामुपजीवन्ति' इति श्रुतिसिद्धः ।

एतदनुमानस्य यः त्वदुक्तः अकर्मवश्यानन्दत्वात् निकर्षशून्यः इति सत्प्रतिपक्षः सोऽपि अत एव उक्तप्रमाणबाधितः ।

यच्चेक्षुक्षीरसेवनेन ईशमुक्तयोः समानानन्दत्ववचनं तत् आत्मनः प्राकाम्यसिद्धिलक्षणानभिज्ञतां ज्ञापयति । योगिनो जीवस्यापि प्राकाम्यसिद्धिमतः समानफलभक्षणादिना अयोगिनः सकाशादुत्कृष्टा यथेष्टानन्दसंप्राप्तिः सिद्धा यदा, तदा किमु योगेश्वरस्य हरेरिति जानीहि ।

अस्मदादिमुक्तभोगः मुक्तचतुर्मुखभोगान्निकृष्टः अस्मदादिमुक्तभोगत्वादित्यादीन्यपि अनया दिशा समाहितानि वेदितव्यानि।

सर्वे शतगुणोद्रिक्ताः पूर्वस्मादुत्तरोत्तरम्।
पूज्यन्ते चावरैस्ते तु सर्वपूज्यश्चतुर्मुखः॥
.................................।
भुञ्जते मुक्तिरेवं ते विस्पष्टं समुदाहृता॥

इति गारुडवचनेन निरवकाशेन सर्वक्षुद्रोपद्रवनिरासात्। 'स्यादेतत् मुक्ततारतम्यानुमानं कालात्ययापदिष्टं परमं साम्यमुपैति इति श्रुतिविरुद्धत्वात्' इति आशंक्य "श्रुतेः श्रुतिस्मृतिबाधितत्वेन बाधकत्वासंभवात्" इति सुधोक्त्याक्षेपेण यत् प्रलपितं 'न हि कश्चिद्वैदिकः श्रुतेर्बाध इति वक्तुमीहते' इति, तत् 'शास्त्रं हि शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानमि'ति शाबरभाष्यतद्वार्तिकाज्ञानविजृम्भितम्। न ह्यत्र न्यायसुधायां श्रुतेः बाधो नामाप्रामाण्यमुक्तं येन वैदिकत्वहानिः। किं नाम निरवकाशश्रुतिस्मृतिबाधितत्वेन सङ्कोचनमेव। तच्च 'वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना' इति व्याසस्मृतितः मीमांसापरिशुद्धम्। स्थितेऽप्येवं परतत्वप्रद्वेषिणस्तव दुर्भाषणं स्वस्यैव तमःपाताभिमुखतां प्रख्यापयति।

जीवस्वरूपतारतम्यकृतानन्दतारतम्यसमर्थनम्

तदेवं श्रुतिस्मृतियुक्तिज्ञानिप्रत्यक्षैः प्रमितस्य मुक्ततारतम्यस्यापलापदुर्व्यसनेन प्रमितमपि तारतम्यं जीवस्वरूपमात्रे, विकल्प्य यस्त्वतस्य दूषणोपक्रमः, स केन चिद्भूतेन विकल्प्य कृतः द्विरदस्वरूपापलाप इवोपेक्षणीयः। तदुक्तं ह्यात्मतत्त्वविवेके 'विकल्पदूषणाभ्यां स्वरूपं नैव हीयते । प्रमाणसिद्धं तत्कर्तोपेक्ष्यते भूतवज्जनैरि'ति।

परिमाणतारतम्यनिबन्धनं स्वरूपतारतम्यमिति स्वयमेव प्रकल्प्य तत्पक्षे विकल्प्य यः दूषणाडम्बरः, सा छलोक्तिरित्युपहसनीया। सर्वेषां जीवानामविशेषतयाऽणुपरिमाणाङ्गीकारात्। 'उत्क्रान्तिगत्यागतीनामि'ति सूत्रेण तथैव व्यवस्थापितत्वात्। अणोरपि सावयवत्वमेव। न चाणुत्वव्याघातः। 'अविभागः पराणुते'ति तल्लक्षणात्। ते चावयवाः सविशेषाभिन्नाः। अत एवावयवानामारम्भकत्वप्रयुक्तदोषाप्रसक्तिः। शिशुपालाद्येकस्मिन्देहे सज्जीवदुर्जीवसङ्कलनमयुक्तमिति यदुक्तं तदप्यसारम्। प्रमाणसिद्धेऽर्थेऽनुपपत्त्यनवकाशात्। भूताविष्टदेह इवोपपत्तेः। दुर्जीवसंपर्कप्रयुक्ता ईषद्दोषप्रसक्तिः सज्जीवेऽस्त्येव। अत एव 'न तत्र तत्परिहारोपायप्रसक्तिरि'ति त्वदाक्षेपानवकाशः।

यच्चात्रोक्तं मुक्तानां प्रतिबिम्बताप्रयोजकोपाधिर्नेति तदपि दुर्ज्ञानविलसितम्। मुक्तौ बाह्योपाधिलयेऽपि स्वरूपाधिस्थितेः।

तथा हि भगवद्वचनं (गी.भाष्यं अध्यायः २ श्लोकः १८)

'प्रतिपत्तौ विमोक्षस्य नित्योपाध्या स्वरूपया ।
चिद्रूपया युतो जीवः केशवप्रतिबिम्बकः ॥' इति ।

यच्चोक्तं मुक्तजीवानामंशत्वे कृष्णरामादिवत् न आनन्द-तारतम्यप्रसक्तिरिति तत्,

'प्रतिबिम्बांशका जीवाः प्रादुर्भावा हरेः स्मृताः ।
प्रतिबिम्बेष्वल्पसाम्यं स्वरूपाणीतराणि तु ॥'

इति श्रुत्यैव निराकृतम् । अत एव स्वरूपांशकत्वादेव भगवतः प्रादुर्भावाणां न संख्याबहुत्वनिमित्ताऽन्योन्यं त्वदुक्ता भेदप्रसक्तिः । अन्यथा भगवति स्वगतभेदनिषेधकश्रुतिस्मृतिव्याकोपप्रसङ्गः ।

सांशजीवस्वरूपतारतम्यकृतानन्दतारतम्यसमर्थनम्

एतेन सांशजीवानां देवादीनां सांशत्वादेव संसार इव मुक्ता-वप्यधिक्य उक्ते यः तदाक्षेपः कृतः सोऽपि निरस्तः । तथा हि :—

अंशिनैव शरीरधारणसंभवादंशाभ्युपगमो निरर्थक इति यदुक्तं तदयुक्तम् । अणोर्जीवस्य अंशिदेहे सम्यगवस्थितस्य शरीरान्तरेष्वप्यवस्थानायांशाभ्युपगमस्यावश्यकत्वात् ।

'अचिन्त्ययेशशक्त्यैव ह्येकोऽवयववर्जितः ।
आत्मानं बहुधा कृत्वा क्रीडते योगसंपदा ॥'

इत्यादिप्रमाणसिद्धस्य अंशरूपैः पृथगवस्थानस्य प्रयोजनाभावेनापलापस्य बालिशत्वात्। यदुक्तं अंशानां परस्परं अभेदः ईश्वरसङ्कल्पमात्रनिबन्धनश्चेत्किं विशेषेणेति तत्तुच्छम्। न ह्यस्माभिर्विशेषः अभेदस्य प्रतिनिधिरित्युक्तम् येनैवं पर्यनुयोज्येमहि किं नाम भेदस्यैवेति।

त्वया विकल्पितः अंशानां भेदाभेदपक्षस्तु अनङ्गीकारपरास्तः। भेदस्यानङ्गीकारादेव।

यदुक्तं निरवयवत्वेन प्रमितस्य कथं सावयवत्वकल्पनमिति तदप्यसारम्। उदाहृतप्रमाणेन सावयवत्वस्यापि प्रमितत्वेन न तत्कल्पनाऽवकाशः। यदप्युक्तं भेदप्रयुक्तव्यवहारमात्रसंपादकतया त्वयेष्यमाणो विशेष एकत्वानेकत्वरूपार्थसंपादकः कथं स्यादिति तदपि स्थूलम्। भेदप्रतिनिधित्वेन विशेषः सामान्यतो भेदकार्यनिर्वाहक इत्येवाभ्युपगमात्।

यदुक्तं गुणगुणिनोरवयवावयविनोः संबन्धस्त्वन्मते नाङ्गीक्रियत इति तत्तुच्छम्। अभिन्नयोरपि संबन्धस्य विशेषबलेन मन्मतेऽङ्गीकृतत्वात्। 'ब्रह्मण आनन्दः' इति गुणगुणिन्नोः संबन्धस्य, 'तस्य प्रियमेव शिरः' इति अवयवावयविनोः संबन्धस्य च प्रमितत्वेन तत्राभेदेऽपि संबन्धितया व्यवहारनिर्वाहाय विशेषः समाश्रितः। 'भेदसंबन्धकार्यकरो हि विशेष' इति सुधयाऽभिन्नयोर्भेदसंबन्धः एव प्रत्याख्यातः। न तु संबन्धमात्रम्। गुणगुणिनोः संबन्धस्यैवाभावे गुणस्यान्यसंबन्धित्वापातात्। मेरु-

मन्दरादिवत्स्वातन्त्र्येण प्रतीतिप्रसङ्गात् । भेदसंबन्ध एव हि दण्डी चैत्र इत्यादौ विशिष्टप्रतीतिनिर्वाहको दृष्टः । 'अयं पट एतत्संबद्ध' इत्यत्रापि न्यायसुधायां आधाराधेयभावव्यवहारनिर्वाहको भेदसंबन्धः संयोगादिरेव निराकृतः । अयावद्द्रव्यभाविस्थले गुणगुण्यादीनां भेदस्यापि सत्त्वेन तत्प्रतिनिधिर्विशेषो नोपेयते इत्येव विशदीकृतम् । अत एव जन्मादिनये सुधायां विशेषसमर्थनावसरे अभेदेऽपि विशेषनिर्वाह्याणि सर्वाणि भेदकार्याणि, अर्थक्रियाभेदः हानोपादानादिकं, विरुद्धयोर्भेदाभेदयोरेकत्र समावेशः इत्यादिकानि उदाहृतानि ।

एतेन, विशेषस्य जीवेषु अंशभूयस्त्वव्यवहारमात्रकल्पकत्वं न तु तद्भूयस्त्वकल्पकत्वमिति यदुक्तं तत्प्रत्युक्तं वेदितव्यम् । भेदाभावे सकलभेदकार्यकरत्वेनैव विशेषस्य सिद्धत्वात् । तस्य च स्वनिर्वाहकत्वेन विशेषभेदपरम्परयाऽनवस्थानाभावात् । अतो विशेषबलेन योगिष्वंशभूयस्त्वं अविकलमेवेति निरंशजीवेभ्यो देवानां सांशानां मुक्तावप्यानन्दातिशयवत्त्वं निराबाधमिति स्थितम् ।

प्रत्यक्षेण विशेषसिद्धिसमर्थनम्

" 'तन्तवः पटः' 'शुक्लः पटः' इत्याद्यभेदव्यवहारयोग्यताऽवच्छेदको विशेषोऽपि अभेदप्रत्यक्षबुद्धिविषयः इति प्रत्यक्षमेव विशेषे प्रमाणम्' " इति सिद्धान्तोक्तं विशेषे प्रत्यक्षं प्रमाणमनूद्य,

यदुक्तम् अत्र, तन्तुत्वावस्था पटत्वावस्था चेति प्रकारयोः, शौक्ल्य-पटत्वयोः गुणजात्योर्वा नाभेदप्रतीतिः किं तु तदवच्छिन्नस्य द्रव्य-स्यैव । तेन तन्तुपटयोः शौक्ल्यपटयोर्वाऽभेदस्य प्रत्यक्षाविषयत्वेन न विशेषे प्रत्यक्षमिदं प्रमाणम् इति तत्तुच्छम् । पटत्वशुक्लत्वयो-रेकस्थत्वभाने पटशुक्लयोरैक्यस्यापि तदन्तर्गतिः । अन्यथा क्वाप्यभेदो न सिद्ध्येत् ॥ घटः पटो नेति धीश्च भेदविषया न स्यात् । पटस्य तन्त्वन्यत्वे च गुरुत्वद्वयं स्यात् । तन्तुयुक्ते भूतले पटवृत्तिश्च न स्यात् । मूर्तानां समानाधिकरणताऽयोगात् । (न्याया-मृतम्) । व्यतिषङ्गविशेषविशिष्टास्तन्तव एव पटः, शौक्ल्यं पटत्वं चापि पटाभिन्ने एवेति प्रत्यक्षप्रतीत्या सुस्फुटमवगाहनात् तदप-लापो दुराग्रहमूल एवेति भवत्येवैतत्प्रत्यक्षं विशेषे प्रमाणम् । यथैतत्तथोपपादितमधस्तादद्रव्याद्रव्यविभागखण्डनावसरे ।

व्यवहारान्यथानुपपत्त्या विशेषसाधनसमर्थनम्

यदप्युक्तम्, 'पटोपलम्भेऽपि शौक्ल्याद्यनुपलम्भान्यथाऽनुप-पत्त्या विशेषसिद्धिरिति तन्न । चक्षुःसंयोगविरहात् विषयालोक-संयोगविरहाद्वा शौक्ल्याद्यनुपलम्भः अन्यथासिद्ध' इति । तदपि भ्रान्तिविलसितम् । न हि शौक्ल्याद्यनुपलम्भमात्रं विशेषाक्षेपक-मित्युक्तं किं नाम पटोपलम्भविशिष्टम् । चक्षुःसंयोगाद्यभावे खलु उभयेषामनुपलम्भो युक्तः । न तु अन्यतरमात्रस्य । उभयोरभेदात् । अतः प्रतीतत्वेऽप्यतीतत्वं हि भेदकार्यम्, भेदाभावे स्वकार्य-निर्वाहकं विशेषमाक्षिपत्येव ॥

यच्चोक्तं, 'गुणगुण्यादिस्थले भेदाभेदयोर्विरोधेऽपि प्रमाणबलेन न तयोर्विरोध इति प्रतिवादी चेद् ब्रूयात् तं प्रति विरोधशमनान्यथोपपत्तेर्वक्तुमशक्यत्वमि'ति तन्न। हन्तैवं तर्हि जीवनवत्त्वं गृहेऽभावश्चेति उभे प्रमिते इति चेत्परो ब्रूयात्तर्हि तं प्रति न अन्यथानुपपत्त्या बहिर्भावसिद्धिः इत्यपि स्यात्। आपाततो विरुद्धार्थे प्रवृत्तयोः प्रमाणयोर्विरोधशमनान्यथोपपत्त्या तत्सिद्धिरिति चेत्सममत्रापि।

किं च त्वया स्वरूपलक्षणभूतो निरतिशयानन्दो ब्रह्मणोऽङ्गीकृतः। (प.४२)। न च स्वरूपाल्लक्षणं भिन्नमिति वक्तुं युक्तम्। स्वरूपत्वोक्तिव्याघातात्। भिन्नत्वे भेदपरम्पराङ्गीकारापत्त्या अनवस्थानाच्च। तत्परिहाराय भेदस्य स्वनिर्वाहकत्वं कल्पनीयम्। न च तद्युक्तम्। स्वरूपत्वेऽपि लक्षणे अप्रामाणिकं धर्मिणं भेदं प्रकल्प्य तत्र प्राप्तानवस्थापरिहारार्थं भेदस्य स्वनिर्वाहकत्वरूपधर्मकल्पनाऽपेक्षया क्लृप्ते ब्रह्मरूपधर्मिण्येव विशेषाख्यधर्माङ्गीकारस्योचितत्वात्। अतो धर्मिकल्पनातो वरं धर्मकल्पनं इति त्वदुदाहृतो न्यायस्त्वामेव हन्ति।

विशेषस्तु स्वनिर्वाहकत्वेनैव सिद्धः इति न तत्र तत्कल्पनम्। स च पदार्थस्वरूपमेवेति नानवस्थाऽपि।

यच्चोक्तं " 'आत्मानमात्मना वेत्सि' इत्यत्र च आत्मना स्वधर्मभूतज्ञानेन स्वधर्मिस्वरूपं स्वेतरसर्वशरीरकत्वादिना वेत्सि इत्यर्थाश्रयणान्न विरोध इति न ततोऽपि विशेषकल्पनाऽवकाश"

इति तदपि लोकोत्तरम्। अक्षरबाह्यत्वात्। आत्मशब्दस्य अनेकार्थकल्पनाऽऽपत्तेश्च। न हि आत्मना इत्यस्य आत्मभिन्नेन ज्ञानेनेति अर्थं कोऽप्यनुन्मत्तो वदति। न हि त्वया धर्मभूतं ज्ञानं आत्मस्वरूपमित्युररीकृतम्। येनोक्तदोषनिस्तारः।

एतेन, सत्ता सती, प्रमेयं प्रमेयं इत्यादौ अनेकार्थकल्पनेन विशेषापलापदुरुपक्रमोऽपि परस्य निन्द्य इति मन्तव्यम्।

ईश्वरशक्त्या अन्यथासिद्धिं परिकल्प्य त्वदुक्तः अशेष-वस्तुगतविशेषाख्यपदार्थशक्तेः प्रमिताया अप्यपलापस्तु प्रागेव परास्तः। तथा सति वह्न्यादौ दाहादिशक्त्यादीनामपि तत एवापह्नवापत्तेः। प्रमितत्वादङ्गीकारस्तूभयत्र समः।

विशेषे श्रौतार्थापत्तिसमर्थनम्

यच्चोक्तं 'एवं धर्मान् पृथक् पश्यन्नि'ति श्रौतार्थापत्तिरपि न विशेषे प्रमाणं इति तदप्यसारम्। इयं खलु श्रुतिर्भेदनिन्दनेन अभेदं समर्थयन्ती एवमपि धर्मिधर्मभावाभिधानेन तद्घटनाय विशेषं च व्यवस्थापयन्ती स्फुटमुपलभ्यते।

यदत्रोक्तं गुणगुणिनोर्गुणानां च परस्परं भेदस्यैव बहुश्रुतिप्रति-पन्नतया 'एवं धर्मानि'ति श्रुतेस्तदभेदप्रतिपादकत्वासंभव इति तत्तुच्छम्। तादृशभेदप्रतिपादकश्रुतेरेकस्या अप्यभावात्। त्वदु-दाहृतासु 'आनन्दं ब्रह्मणो विद्वान्' 'यः सर्वज्ञः' इत्यादिषु भेदा-

श्रवणात्। संबन्धोक्तिमात्रेण तत्र भेदकल्पनं तु न युक्तम्। निरवकाशया 'एवं धर्मान्' इति श्रुत्या भेदस्य प्रतिषिद्धत्वेन तत्कल्पनाऽनवकाशात्। सावकाशनिरवकाशयोर्निरवकाशस्यैव खलु प्राबल्यम्।

यच्चोक्तं ब्रह्मणो विज्ञानानन्दाभिन्नत्वेऽपि विज्ञानत्वानन्दत्व-रूपप्रवृत्तिनिमित्तभेदमादाय अपरिशेषापर्यायत्वयोः संभव इति तदप्यसारम्। एवं धर्मानिति श्रुत्या तयोरपि भेदनिषेधात्। अर्थ-प्रकाशत्वनिरुपाधिकेष्टत्वरूपयोः तयोरर्थप्रकाशनिरुपाधिकेष्टरू-पाश्रयविशेषसापेक्षत्वाच्च। (न्यायामृतम् प. ५६३)

यश्चात्र उक्तदोषपरिहाराय विज्ञानानन्दयोर्भेदसमर्थनाडम्बरः 'श्रूयतामवधानेन' इत्यादिना प्रदर्शितः स स्वाभ्युपगमविरुद्धः। अभेदेऽपि प्रवृत्तिनिमित्तभेदमाश्रित्य स्वसमर्थितव्यवहारनिर्वाह-पराहतः। 'एवं धर्मानि'ति श्रुतिप्रतिषिद्धश्च।

ज्ञानानन्दयोरेकतरपरिशेषे च मोक्षे आनन्दप्रकाशो न स्यात्।

यश्च आकाशशब्दस्य शब्दाश्रयत्वादन्यनिमित्तप्रदर्शनप्रयासः सोऽपि घट्टकुटीप्रभातन्यायपुरस्कारः। अन्यस्यापि निमित्तस्य आकाशाभिन्नत्वेन विशेषं विना व्यवहारनिर्वहणाक्षमत्वात्।

यत्तु विशेषस्य क्लृप्तपदार्थेष्वन्तर्भावाभावकथनेन निरसनं तच्छलमेव। तस्य तत्तत्पदार्थस्वरूपत्वाङ्गीकारात्।

विशेषसाधकानुमानसमर्थनम्

यदपि विशेषे साधकानुमाननिराकरणं, तदसंबद्धम् । प्रागुक्तप्रत्यक्षागमानुगृहीतानां तेषां निराकरणायोगात् । ब्रह्मस्वरूपभूतयोः विज्ञानानन्दयोः एकतरपरिशेषाभावः, भेदान्यनियम्यः भेदानियम्यत्वे सति नियम्यत्वात् इति प्रयोगे विज्ञानानन्दयोः ब्रह्मसंबन्धानङ्गीकारादाश्रयासिद्धिः स्वरूपत्वाङ्गीकारे द्विवचनानुपपत्तिरिति यो दोष उक्तः सः अपहसनीयः । धर्मिभिन्नसंबन्धस्यानङ्गीकारेऽपि विशेषणताऽऽख्यस्वरूपसंबन्धाभ्युपगमेन द्विवचनोपपत्तेः ।

एकतरपरिशेषाभावशब्दार्थं विकल्प्य या दोषोक्तिः तच्छब्दाडम्बरमात्रम् । विज्ञानान्दयोर्मध्य एकस्य आनन्दस्यैव वा ज्ञानस्यैव वा परिशेषः नेतरस्येत्यर्थस्य सुस्फुटत्वात् । स च घटपटस्थले भेदेन निर्वाह्यः । भेदहीने तु तत्प्रतिनिधिनैव । न च अत्र साध्यकोटौ भेदान्यपदेन विशेषत्वेन तद्विवक्षणे साध्याप्रसिद्धिरिति वाच्यम् । सत्यां व्याप्तौ तस्या अदोषत्वात् । वादिवाक्यात्प्रतिवादिनस्तत्प्रसिद्ध्युपपत्तेः । सामान्यव्याप्तेः सर्वथाऽक्षुण्णत्वात् ।

किं च भेदान्यत्वेनैव तस्य विशेषस्य साध्ये प्रवेशात् नाप्रसिद्धिशङ्काऽपि । भेदकार्यविशेषस्य अपरिशेषादेः सामान्यकारणेन अदृष्टादिमात्रेणानिर्वाहान्न त्वदुक्तं सिद्धसाधनम् । पक्षधर्मताबलात् भेदप्रतिनिधेर्विशेषस्य सिद्धिश्च । विपक्षे हेतूच्छित्तिर्बाधिका ।

भेदान्यानिर्वाह्यस्य भेदकार्यस्य भेदहीने वस्तुनि भेदप्रतिनिधिनाऽप्यनिर्वाहे तस्य निर्वाह्यत्वमेव न स्यादिति ।

यदपि पूर्वोक्तानुमान एव प्रमेयत्वादेः स्वाश्रितत्वं इति पक्षीकारे, किं प्रमेयत्वमात्रं एकं उत भिन्नं इति विकल्प्य दूषणाभिधानं तदपि तुच्छम् । एकमेवेत्यङ्गीकारात् । न च तथा सति स्वाश्रितत्वस्य गौणत्वेन आश्रयासिद्धिरिति वाच्यम् । प्रमेयत्वे न प्रमेयत्वं इति कदाऽपि बाधज्ञानाभावेन गौणत्वकल्पनाऽयोगात् ।

स्वाश्रितत्वव्यवहारस्य पक्षत्वेऽपि न त्वदुक्ते बाधासिद्धी प्रसरतः । शब्दप्रवृत्तिनिमित्तयोरेकत्वेन तद्भेदनियम्यत्वोक्त्यसंभवात् ।

एतेन स्वरूपभूतं विज्ञानानन्दादिकं भेदान्यैकतरापरिशेषादिनिर्वाहकवत् इति द्वितीयानुमानमपि समाहितम् । एकतरपरिशेषाभावः इत्यस्य ज्ञानानन्दयोर्द्वित्वमित्यर्थं गृहीत्वा भेदान्यस्य द्वित्वनिर्वाहकत्वाभावादिति यत्तत्र बाधदूषणमुक्तं तत्तुच्छम् । अन्योन्याश्रयादेव । न हीतः प्राग्विशेषाभावः सिद्धः । येन त्वदुक्तबाधदोषप्रसरः । न च प्रवृत्तिनिमित्तभेदेन सिद्धसाधनम् । स्वरूपभूतयोः प्रवृत्तिनिमित्तभेदस्यापि विशेषं विनाऽनुपपत्तेः ।

एतेनैव स्वाश्रितं प्रमेयत्वादिकं भेदान्याश्रयाश्रयिभावनिर्वाहकवत्, भेदहीनत्वे सति आश्रयाश्रयिभावरूपनिर्वाह्यवत्त्वात् । इति तृतीयानुमानमपि निर्दोषमेवेति सिद्धम् । प्रमेयत्वे

प्रमेयत्वं इत्यबाधितप्रतीतिबलेन प्रमेयत्वे स्वाश्रितत्वस्यैवाङ्गीकारेण मन्मते त्वदुक्तायाः आश्रयविशेषणासिद्धेः अप्रसक्तेः । यदुक्तं भेदहीनत्वघटितहेतोर्मन्मते स्वरूपासिद्धिरिति तदपि हेयम् । देवदत्तः सिंहो नेतिवत् अत्र प्रमेयत्वं न प्रमेयं इति भेदाप्रतीतेः । भेदाङ्गीकारेऽनवस्थाप्रसङ्गस्योक्तत्वेन च प्रमेयत्वतदाश्रितप्रमेयत्वयोर्भेदस्याप्रामाणिकत्वात् प्रमाणविरुद्धत्वाच्च भेदहीनत्वहेतोः स्वरूपासिद्धेरशक्यशङ्कत्वात् ।

स्वाश्रितत्वं निर्वाहकविशेषवदिति प्रतीतेर्विशेषनिर्वाह्यत्वेन न साध्ये त्वदुक्तमतुबर्थानुपपत्तिः । धर्मिग्राहकप्रमाणैर्विशेषस्य स्वनिर्वाहकतयैव सिद्धेर्नानवस्थाऽपि ।

तदेवं विशेषस्य पूर्वोक्तरीत्या प्रत्यक्षेण, 'स्वरूपेऽपि विशेषोऽस्ति स्वरूपत्ववदेव तु । भेदाभावेऽपि तेनैव व्यवहारश्च सर्वतः' इति परमोपनिषदा, 'तस्मादेकमनन्तधा' । व्यवहार्यं विशेषेण दुस्तर्कबलतो हरेः । विशेषोऽपि स्वरूपं स स्वनिर्वाहकताऽस्य च' इति ब्रह्मतर्केण, 'अभेदेऽपि विशेषोऽस्ति व्यवहारस्ततो भवेदि'त्यादिस्मृत्या च सिद्धत्वेन विशेषसाधकानां अनुमानानां प्रत्यक्षागमानुगृहीतत्वेन न त्वदुक्तक्षुद्रदोषावकाश इत्यलं निर्दलकुकल्पनानां निरसनेन ।


एवं च सर्वप्रमाणसिद्धविशेषबलेन स्वरूपात्मकैरेव निर्दोषाशेषसद्गुणैः परिपूर्णो भगवान्विष्णुरिति निराबाधमवस्थितमित्यशेषमतिमङ्गलम् ॥

इति श्रीमद्विजयीन्द्रतीर्थपूज्यचरणविरचित-
सर्वसिद्धान्तसारासारविवेचनगतस्य
रामानुजमतनिरासपरस्य
दशमपरिच्छेदस्य
मण्डनात्मकं

श्रीमद्विजयीन्द्रविजयवैभवम्

श्रीसत्याभिज्ञतीर्थपूज्यपादपद्माराधक-
श्रीसत्यप्रमोदतीर्थविरचितं
संपूर्णम् ।

श्रीकृष्णार्पणमस्तु ॥



ದ್ವೈತಸಿದ್ಧಾಂತ, ಪ್ರಾಚೀನ ಕೃತಿ ಸಂಶೋಧನೆ ಹಾಗೂ ಭಾರತೀಯ ಸಾಂಸ್ಕೃತಿಕ ಮೂಲದ ತಾತ್ವಿಕ ಚಿಂತನೆಗೆ ತಮ್ಮ ಬದುಕಿನ ಬಹುಭಾಗವನ್ನು ವಿನಿಯೋಗಿಸಿ, ಪಾಠಪ್ರವಚನ, ದರ್ಶನ ಪ್ರಚಾರಗಳಿಗೆ ಜೀವನವನ್ನು ಮುಡಿಪಿಟ್ಟು ಇಂದಿಗೂ ಸಿದ್ಧಾಂತಸ್ಥಾಪನೆಯಲ್ಲಿಯೇ ಸಂಪೂರ್ಣ ತೊಡಗಿದ್ದು ಪಳಗಿ ಪಕ್ವವಾಗಿರುವ ಅಪರೂಪದ ಜೀವ **ಶ್ರೀ ಕೇಶವಾಚಾರ್ಯ ಶ್ರೀನಿವಾಸಾಚಾರ್ಯ ಕಟ್ಟಿ.**

ವ್ಯಾಸತ್ರಯದಲ್ಲಿ ವಿಶಿಷ್ಟ ವಿದ್ವನ್ಮಣಿಗಳಾದ ಕೇಶವಾಚಾರ್ಯರು ತಮ್ಮ ಸತ್ಯಧ್ಯಾನವಿಜಯ, ನ್ಯಾಯಸುಧಾಮಂಡನ ಪ್ರಕಾಶ, ಜಯತೀರ್ಥಸುಪ್ರಭಾತ ಮುಂತಾದ ವಿದ್ವತ್ಪೂರ್ಣ ಮೌಲಿಕ ಕೃತಿಗಳಿಂದ ತಾವು ಬಾಳಿದ ಸಮಾಜದ ಉತ್ಕರ್ಷಕ್ಕೆ ನೀಡಿರುವ ಕೊಡುಗೆ ಮಹತ್ವಪೂರ್ಣವಾದುದು. ಜಾಗೃತ ಮನೋಧೋರಣೆಯ ಬಹುಭಾಷಾ ವಿದ್ವಾಂಸರಾದ ಕಟ್ಟಿ ಆಚಾರ್ಯರು ಪರಂಪರೆಯಿಂದಲೇ ಸಂಸ್ಕೃತ ಮನೆತನದವರು. ಸಾಹಿತ್ಯ, ದರ್ಶನ, ವ್ಯಾಕರಣ, ಸಂಶೋಧನೆ, ಸಂಪಾದನೆಗಳಲ್ಲಿ ಪರಿಣಿತರು. ನಿಶಿತಮತಿ, ಅಗಾಧ ಪಾಂಡಿತ್ಯ, ನಿಷ್ಕಾಪಟ್ಯ, ಸ್ನೇಹವಿಶ್ವಾಸಗಳೇ ಮೂರ್ತಿವೆತ್ತಂತಿರುವ ಕಟ್ಟಿ ಆಚಾರ್ಯರು ತತ್ವಸಂಖ್ಯಾನ, ನ್ಯಾಯಸುಧಾ ಮುಂತಾದ ಗ್ರಂಥಗಳ ಸಂಶೋಧನೆ, ಸಂಪಾದನೆಯ ಮೂಲಕ ಆಚಾರ್ಯಶಾಸ್ತ್ರದ ಎತ್ತರ ಬಿತ್ತರಗಳನ್ನು ನೂರ್ಮುಖವಾಗಿ ತೋರಿಸಿದ್ದಾರೆ. ಉತ್ತರಾದಿಮಠದ ಆಸ್ಥಾನ ವಿದ್ವಾಂಸರಾಗಿ ದಶಕಗಳಿಂದಲೂ ಸೇವೆ ಸಲ್ಲಿಸುತ್ತಿರುವ ಆಚಾರ್ಯರು ಬದುಕಿನ ಬಹು ಎತ್ತರದ ಸ್ತರವನ್ನು ಮುಟ್ಟಿರುವ ಹಿರಿಯ ಮಹನೀಯರು. ಸಾತ್ವಿಕಮಾರ್ಗದರ್ಶನದಿಂದ ಸಾರ್ಥಕ ಸೇವೆ ಮಾಡುತ್ತಿರುವ ಕೃತಕೃತ್ಯರು. ಅರಮನೆಗುರುಮನೆ, ಲೌಕಿಕವೈದಿಕಗಳೆರಡರಲ್ಲೂ ವಿಶಿಷ್ಟವಾದ ಸ್ಥಾನವನ್ನೂ, ಪ್ರಶಸ್ತಿ ಪರಂಪರೆಯನ್ನೂ ಪಡೆದ ತೇಜಸ್ವಿಗಳು. ಎಂಬತ್ತು ವರ್ಷಗಳ ತುಂಬು ಬದುಕಿನ, ಪರಿಪೂರ್ಣ ಸಾಧನೆಯ, ಉನ್ನತ ಅಧ್ಯಯನದ, ವಿಸ್ತಾರ ಅನುಭವದ ಫಲಶ್ರುತಿಯಾಗಿ ಹೊರಬರುತ್ತಿರುವ ಈ ಸಂಪಾದಿತ ಕೃತಿ ಆಚಾರ್ಯರ ವಿದ್ವತ್ಪೂರ್ಣ ವ್ಯಕ್ತಿತ್ವದ ಇನ್ನೊಂದು ನಿದರ್ಶನವಾಗಲಿದೆ.